# दशमः सर्गः।

[1]पूर्वसर्गे उद्भ्रान्तिद्वारेण नलस्योन्मादरूपां स्मर-
दशां निवर्ण्य तन्मुखेन तस्य स्वप्रकटनं दूतधर्मापराधं परिकृत्य
स्वयंवरवर्णने सरस्वतीं विवर्णयिषुः [कविर्दशमं] सर्गान्तरमारभते।

रथैरथाऽऽयुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च लब्धपाराः।
स्वयंवरं शम्बरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥१॥

[2]रथैरथायुरिति। अथाऽनन्तरं कुलजाः कुमाराः
[3]रथैः स्वयंवरमायुः [4][आ]जग्मुः। किंभूताः? शस्त्रेषु शास्त्रेषु च लब्ध-
पाराः [5]प्रवीणाः। शम्बरवैरिणः कामस्य कायव्यूहः [6]शरीरसमूहस्त-
द्वत् श्रीः शोभा येषां ते तथा। पुनः किंभूताः? श्रिया लक्ष्म्या जितो
यक्षराट् धनदो यैस्ते तथा ॥१॥

नाऽभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः।
नाऽस्यादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥२॥ /सु

[1]नाऽभूदभूमिरिति। तस्मिन् [[2]राज्ञां] [3]व्रजेषु [4]राज-

1 B om. ~~[illegible]~~ पूर्वसर्गे......क्व सति॥ [दिश्यै] दि... X.4.
ग B text राजः 2 B रथैरिति। 3 B पथैः 4 B अयुः जग्मुः 5 B add.
आपुरिति वा व्याख्येयम्। आपुरिति पाठे आप्तवन्त इत्यर्थः. 6 B कामस्य॥
1 B नाभूदिति। 2 B B om. राज्ञां; ed. add. राज्ञां 3 B B व्रजे
वा 4 B B राज्ञां —

समूहे[षु] व्रजत्सु[5] सत्सु कश्चित् कुमारः स्मरस्य सायकानामभूमि-
रविजयो [6]नाऽभूत् । तथा[7] कुले जातः कुमारः कश्चित् अजन्ता नासीत् ।
अपि तु सर्वोऽपि तत्र जगाम । धरणेः पृथिव्याः कश्चिदपि [[8]कणो] देशो-
पन्था [[9]नाऽस्थात् न] जातः । अपि तु सर्वत्र मार्गाः पतिताः । [पथो
विभाषे (पा० V.iv.62) इति विकल्पः] ॥२॥

---

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् ।
द्रष्टुं परैस्तान् [1]परिकर्तुमन्यैर्[2]लोकैश्च शून्या ककुभां विभागाः ॥३॥

---

[3]योग्यैर्व्रजद्भिरिति । ककुभां [दि]विभागा लोकैः शून्या
रहिता बभूवुः । किंभूतैः ? । योग्यैः कुलशीलोचितैः नृपजां दमयन्तीं
वरीतुं व्रजद्भिः । तथा अनर्हैः अकुलीनैः परं वीरैः समर्थैः तां प्रसभेन
हर्तुं व्रजद्भिः । परैरितरैः कैश्चित्तां द्रष्टुमेव व्रजद्भिः । अन्यैस्तान्
विविधानपि [[4]परिकर्तुं] परिचरितुं व्रजद्भिः । इत्थं सर्वोऽपि लोकोऽऽगता
इत्यर्थः ॥३॥

---

लोकैरशेषैरवनित्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्तितत्तज्जनयन्त्रणार्तिविश्रान्तिमापुः ककुभां विभागाः ॥४॥

---

[1]लोकैरशेषैरिति । ककुभां विभागाः स्वस्ववर्तिनां
तेषां तेषां जनानां या [2]यन्त्रणा आक्रमणं तस्या [3]आर्तिः पीडा ततो
विश्रान्तिं बाधाभावमापुः । क्व सति ? । [[4]दिश्यैः] दिक्षु [5]भवैरशेषैर्लोकै-

---

5 BP2 व्रजति सति 6 P2 नाम 7 B यथा 8 BP2 om. कणो ; edd. add. कणो 9 B
P2 om. नास्थात्[न] ; edd. add. नाऽस्थात्[न] ~~; P2 om. न~~ ॥२॥ 1 P2 text अपरो[ऽ]दु॰
2 P2 text स्वमात्परोऽभा ककुभो बभूवुः ॥ 3 P2 योग्यैरिति । 4 P2 परिहर्तुं — ॥३॥
1 P1 ~~लोकैः~~रिति । 2 B या 3 P2 आर्तिः 4 BP2 om. दिश्यैः ; edd. add. दिश्यैः 5 P1 ins.
in mg. (sec. m.) विनिर्मितम् ॥

स्नानभवने। श्रियं भैमीमुद्दिश्य प्रयाणे विहिते सति॥४॥

तल्लं यथेयुर्न तिला विकीर्णास्तथा [1] पथा भावि महीमहेन्द्रैः।
भैमीं स लब्धामिव तत्र मेने यः प्राप भूभृद्भवितुं पुरस्तात्॥५॥

तल्लं [2] यथेयुरिति। महीमहेन्द्रैः [3] राजभिः कृत्वा पथा मार्गेण [तथा] तादृशेन भावि [4] जातम्। यथा तत्र मार्गे आकाशे तिला विकीर्णाः सन्तः तल्लं भूमिं न ईयुः [5] न जग्मुः। किं च तत्र सङ्कटे यो भूभृत् राजा पुरस्ताद्भवितुं प्राप अग्रे गन्तुं लेभे। स भैमीं लब्धामिव मेने। [7] सैन्यैस्तथा [राज]पथा बभूवुरिति पाठान्तरम्॥५॥

नृपः पुरस्थैः प्रतिबद्धवर्त्मा पश्चात्तनैः कश्चन नुद्यमानः।
यन्त्रस्थसिद्धार्थपथस्थितोऽपि अध्वन्यसिद्धार्थममन्यत स्वम्॥६॥

नृपः [इति]। कश्चन [2] नृपः अध्वनि मार्गे स्वमसिद्धार्थ- [3] ममन्यत। किंभूतः?। यन्त्रस्थो यः सिद्धार्थस्तैलिकचक्रपीड्यमानः सर्षपः तत्पथे [4] स्थितोऽपि अतिसङ्कटेन प्राणोत्क्रान्तिभयात्। यः किल सिद्धार्थपथे [5] स्थितः, स कथं स्वमसिद्धार्थममन्यत इति विरोधाभासः। किंभूतः?। पुरस्थैर्नृपैः [प्रतिबद्धवर्त्मा [6]] विगृहीतवर्त्मा रुद्धमार्गः। पश्चात्तनैश्च राजभिर्नुद्यमानः प्रेर्यमाणः। पुरःस्थैः प्रतिबद्धे (१३१०) सति। यन्त्र- [8] स्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वमिति पाठान्तरम्॥६॥

~~४~~॥४॥ 1 P2+ed. सैन्यैस्तथा राजपथा बभूवुः। 2 P तल्लम्; P2 तल्लमिति। 3 B महा°; P महेन्द्रो M.B °वादि 5 P2 °युः 6 P राज 7 P2 om. सैन्यै... पाठान्तरम्॥५॥ 1 P2 °पदाभिषेकं लब्ध्वा 2 B P P2 कश्चित्; edt. कश्चन 3 P add. अकृतार्थम् M.B तत्पथो; P2 तत्पादं 5 P2 °पदे 6 P P2 om. प्रतिबद्धवर्त्मा 7 P2 om. पुरःस्थैः ...... पाठान्तरम्। 8 B om. no. 6 —॥६॥

सर्ग १० 4

राज्ञां पथि स्त्यानतयाऽऽनुपूर्व्या[1] विलङ्घनाशक्तिविलम्बभाजाम् ।
आह्वानसंज्ञानमिवाग्रकम्पैर्दधुर्विदर्भेन्द्रपुरीपताकाः ॥७॥

[राज्ञां[2] पथीति] विदर्भेन्द्रस्य[3] या पुरी तस्याः पताका राज्ञाम्[4] आगन्तुम् अग्रभागस्य[5] कम्पैः आह्वान[6]संज्ञानमिव दधुः चक्रुः । किंभूतानाम्? । पथि स्त्यानतया प्रतिसंहतया[7] आनुपूर्व्या अनुक्रमस्य विलङ्घनम् अतिक्रमणं तत्राऽशक्तिरसामर्थ्यं तत्र विलम्बभाजाम् । स्त्यै[8] (९३६) ष्ट्यै (९३७) शब्दसङ्घातयोरित्यस्मान्निष्ठातकारस्य, आतोऽन्तस्थासंयुक्तात् (का० IV. i. 103) इति नकारः । संयोगादेरातो[9] धातोर्यण्वत (VIII. ii. 43) इति पाणिनीयम् । आयानसंज्ञानमिवेति पाठे आगमनसंज्ञानमिवेति व्याख्येयम् । केचित्तु - आयातसंज्ञानमिति पाठं पश्यन्ति । विश्वे देवासो [अस्रिध] एहिमायासो अद्रुहः[10] (ऋ० I. 3. 9) इति छन्दस्याख्यातपदस्य [सु]मासप्रयोगं वीक्ष्य, भाषायामपि आख्यातपदसमासं स्वीकृत्य, मर्भैः प्रदानोचित ( ? ) इतिवत् । अविहितलक्षणो मयूरव्यंसकादिषु द्रष्टव्य इत्यायात आगच्छतेति संज्ञानमित्याहुः । पूर्वानुक्रमेणाऽनुपूर्वम् । तस्य भाव आनुपूर्वी । ष्यञः षित्त्वात् वा स्त्रीत्वम् ॥७॥

प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः ।
भुवस्तले कुण्डिनगामि राज्ञां तद्वासुकेस्त्वाऽऽश्वतरोऽन्वगच्छत् ॥८॥

प्राग्भूयेति[1] । कुण्डिनं प्रति यद्गमनशीलं[2] राज्ञां[3] नाग-

1 P2 text ऽनुपूर्वी 2 P1 राज्ञाम् ; P2 om. राज्ञां पथीति । 3 P2 om. तस्य 4 P2 om. राज्ञां 5 P1 om. भाग० 6 P1 om. आह्वान० 7 P2 अतिसंहननतया 8 BP1P2 ष्ट्यै स्त्यै 9 P2 om. संयोगादे... स्त्रीत्वम् 10 BP1P2 एह ॥ B-6.-॥७॥

1 P1 प्राग्भूय ; P2 प्रागिति । 2 P2 गमनशीलं यत्र 3 P2 om. राज्ञां

बलम् । अन्ये तु समस्तं राजविशेषणमाहुः । [4]समासान्तविधेरनित्यतां च ।
तदा कुण्डिनगामि[नां] राज्ञां यन्नागबलं हस्तिबलं सैन्यं सकम्बलं[5] कर्कः
श्वेतो[6]ऽश्वोऽरकोऽरनशीलः प्राग्भूय भुवस्तले उच्चैस्तर[7]माचकर्ष । त-
द्बलमश्वतरः[8] प्रकृष्टोऽश्वोऽन्वगाच्छत पश्चाज्जगाम । जातावेकवचनम् ।
सैन्ये हि अग्रे अश्वास्तदनु [नागाः तदनु] पुनरप्यश्वाः सञ्चरन्ति । न
केवलं राज्ञां बलम् । वासुकेश्च नागराजस्य नागानां सर्पाणां बलं
कम्बलनागसहितं भुवस्तले पाताले स्थितम् । कर्कोटको नागः प्राग्भूय
उच्चैः पृथिव्यामाचकर्ष । तद्बलमश्वतरश्च[10] नागोऽनु पश्चादन्वगाच्छत्[10] ।
वासुकिरपि [11]तत्र जगामेत्यर्थः ॥८॥

---

आगच्छदुर्वीन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः ।
विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम् ॥९॥

---

[1]आगच्छ[दिति] । हरितो दिशस्ता एव वध्वस्तासां मुख-
श्रीः आत्मीयं रूपं विस्पष्टं प्रकटं पत्युस्त्यागेन यां[2] [दशा[3]] अवस्था[4]
विरहिणीदशा तदनुरूपमाचष्ट । किंभूता ? । आगच्छन्तो[5] ये उर्वीन्द्रा
राजानः तेषां चमूसमुत्थैर्भुवो रेणुभिः पाण्डुरिता । दिशां जनेषु इति
पाठान्तरम् ॥९॥

---

आखण्डलो दण्डधरः [1]शिखावान् पतिः प्रतीच्याश्च दिशां महेन्द्रैः ।
भैम्येव बद्धा स्वगुणेन कृष्टैः स्वयंवरे तत्र गतं न शेषैः ॥१०॥

---

4 B2 om. समासा°... तदा 5 B2 सकलं 6 B श्वेतो twice 7 B2 °स्वर° 8 P1 om. विसर्ग; 9 B2 om. अपि 10 B2 °मश्वनागः 11 P1 om. अनु 12 P1 तत्रा° — ॥८॥

1 P1 आगच्छ । 2 BP1 वा 3 BP2 om. दशा 4 P1 om. अवस्था 5 BP2 आगच्छतोना ॥९॥

1 P2 +श्च. कृशानुः पाशीतिनाथैः ककुभां चतुर्भिः ।

सर्ग १० 6

आखण्डल:[इति]। तत्र स्वयंवरे इति दिशां महेन्द्रैर्गतं, न शेषैर्दिक्पालै:। एक आखण्डलोऽपरो दण्डधरो यम: तथा शिखावान् वह्नि: प्रतीच्या: पतिर्वरुणश्च। उत्प्रेक्षते - भैम्या दमयन्त्या: स्वगुणेन लावण्यादिना बद्धा कृष्टैरिव। अखण्डं सर्वं लाति गृह्णाति, तदधीनत्वात् सर्वस्याऽसौ गतवान्। स्वार्थेऽण्। अथवा आखण्डं खण्डम् अभिव्याप्य लातीत्याखण्डल:। अभिविधावाङ्। सर्वमपि गृह्णातीत्यर्थ:। अपरश्च सर्वेषां दण्डं दमनं धरतीति तदभिमानित्वात्। इतरश्च [शिखावान्] सर्वशिरोमणित्वे स्थितत्वात्। चरमस्तु प्रतीचीपतित्वात्, प्रतीपं प्रतिकूलम् अञ्चति या स्त्री तस्यां विरक्तत्वात्। अनुकूलां दमयन्तीं प्रति जगाम। कृशानु: पा०।३।१०७ रीतिनाथै: ककुभां चतुर्भि[रिति]। ययौ तदुद्गाहरसान्न शेषैरिति च पाठान्तरम्॥१०॥

मन्त्रै: पुरं भीमपुरोहितस्य बद्धद्रक्षं विशतु क्व रक्ष:।
तत्रोद्यमं विव्यतिराततान यातुं ततो जातु न यातुधान:॥११॥

मन्त्रै:[इति]। तत्र स्वयंवरे इतरेषां दिक्पालानाम् अगमने कारणमाह। यातुधानो[नाम] दिक्पति: तत: कारणात् जातु कदाचिदपि तत्र यातुम् उद्यमं न [आ]ततान। यतस्तत्पुरं भीमनृपपुरोहितस्य मन्त्रै: सर्वत्र बद्धरक्षम्। ततो रक्षो राक्षस: क्व विशतु विशति? न क्वापि तस्य प्रवेशावकाश इत्यर्थ:॥११॥

2 B2 दिग्महे° 3 B2 बद्धा° 4 B2 om. अथवा ..... लातीत्यर्थ:। 5 B1 धारयतीति 6 B1 शिखायां 7 B2 ययौ —— ॥१०॥
1 B2 text विशति 2 B2 मन्त्रै: पुरमिति। 3 B2 रक्ष 4 B2 om. विशति
5 B2 तत्र —— ॥११॥

सर्ग १० 7

कर्तुं शशाकाभिमुखं न भैम्या मृगं दृगम्भोरुहलर्जितं यत् ।
अस्या विवाहाय ययौ विदर्भांस्तद्वाहनस्तेन न गन्धवाहः ॥१२॥

1कर्तुम् [इति] । 2तेन कारणेन 3गन्धवाहो वायुः दिक्पालो अस्या विवाहाय विदर्भान् देशान् । विदर्भाम् इति पाठे नगरीं [न] ययौ । 4यत्कारणात् भैम्या अभिमुखं 5मृगं वाहनं स वायुः कर्तुं न शशाक । किंभूतम् ? । दृगम्भोरुहेण तर्जितं निर्भर्त्सितम् । दमयन्त्या दृशा मृगदृक् जिता । 6किंभूतः ? । तद्वाहनः । स 7मृगो वाहनं यस्य स तथा । अतो मृगस्याऽनागमनात् सोऽपि नाऽऽयातः ॥१२॥

जातौ न वित्ते न गुणे न कामः सौन्दर्य एव प्रवणः स वामः ।
स्वच्छस्वशैलेक्षितकृत्स्नबेरस्तां प्रत्यगान्न स्मितमां कुबेरः ॥१३॥

1जातौ [इति] । कुबेरो धनदो दिक्पतिस्तां भैमीं प्रति नागात् । किंभूताम् ? । स्मितमामुत्कृष्टां स्त्रीं स्मितमाम् । तमप्प्रत्ययेन वा ह्रस्वः । किंभूतः ? । स्वच्छो निर्मलो यः स्वशैलः कैलासस्तत्र [ईक्षितं] कृत्स्नं बेरं शरीरं येन [स] तथा । धनदो हि शरीरेण सरोगोऽस्ति । अतो न जगाम । यतः स 3कामो जातौ न प्रवणः । 4वित्ते च न प्रवणः । न गुणे 5शौर्यौदार्यादिके 6 । किन्तु सौन्दर्य एव केवले प्रवणः । अतोऽस्य स वामः प्रतिकूलः ॥१३॥

1 I2 कर्तुं शशाकेति । 2 B तत्र 3 B ०वहो 4 I2 स्थितः 5 I2 om. मृगं 6 I2 om. किंभूतः --- स तथा 7 I1 ०नागतः ॥१२॥

1 I2 जातौ न चित्ते इति । 2 I1 स्वः 3 I2 om. स 4 I1 om. चित्ते ... केवले प्रवणः । 5 I2 शौर्यदया० 6 B ०दिकः — ॥१३॥

सर्ग २० 8

भैमीविवाहं सहतेऽस्य कस्मादर्द्धं तनुर्या गिरिशस्य गौरी।
ध्रुवं न याम्या विदधे विदर्भाजीशानयानाय तयाऽन्तरायः॥१४॥

भैमीति]। या गौरी गिरिशस्यार्द्धं तनुः शरीरं सा अस्य खलु पत्युः भैम्या [सह] विवाहं कस्मात् सहते, न कथञ्चित्। अस्येत्यत्र स्येति। गिरिजात्मभर्तुरिति पाठे अतीतकालता। समप्रविभागवचनत्वादर्द्धशब्दस्य नपुंसकता। ध्रुवमिति मन्ये। तथा देव्या। विदर्भान् न याम्या सत्या ईशानस्य श्रीमहादेवस्य दिक्पालस्य यानायाऽन्तराय[यो] विघ्नो विदधे। अर्द्धं देव्याः शरीरं यदि नागच्छति, तदा परमेश्वरो[ऽपि] अपरेणाऽर्द्धेन कथं गच्छति॥१४॥

स्वयंवरं भीमनरेन्द्रजाया दिशः पतिर्न प्रविवेश शेषः।
प्रयातु भारं स निवेश्य कस्मिन्नहिर्महीगौरवसासहिर्यः॥१५॥

स्वयमिति]। शेषो नागः पृथिव्या अधोलोकस्य दिशः पतिः भीमनरेन्द्रजायाः स्वयंवरं न प्रविवेश। यतः स शेषः कस्मिन् सर्पे भारं निवेश्य प्रयातु। योऽहिः सर्पो महीगौरवस्य सासहिः अत्यर्थं सहनशीलः तस्मिन् कस्मिन् भारं निदधातु। स कोऽपि नाऽस्ति। अथवा योऽहिर्नागः शेषः दिशःपतिः महीगौरवस्य सासहिः। महीभृहिः सासहिरस्ति कोऽपीति पाठान्तरम्॥१५॥

(सम 2 B text)
1 B text गिरिजात्मभर्तुः। ~~२~~ देना। प्रजन्त्या 3 B om. विस्फा: 4 B om. गिरिजात्मभर्तुरिति 5 B अयाम्या 6 B om. यानाय 7 ~~B~~ B ~~...~~ न गच्छति॥१४॥
1 B नाम 2 B सर्वे 3 B om. निवेश्य.... कस्मिन् भारं 4 B om. दिशःपतिः 5 B om. स्य 6 B om. महीº.... पाठान्तरम्॥१५॥

[1]स्वयं विमृश्यैव स धर्मशास्त्रं स्वयंवरं प्रास्थित न स्वयंभूः।
व्यलोकि लोके मुनिभिः श्रुतो वा समं विवाहः क्व पितामहेन ॥१६॥

[2]स्वयं[मिति]॥ स स्वयंभूर्ब्रह्मा ऊर्ध्वलोकपालः स्वयं धर्मशास्त्रं विमृश्यैव स्वयंवरे न प्रास्थित[3]। यतो लोके पितामहेन समं विवाहः क्व मुनिभिर्व्यलोकि। क्व वा श्रुतः। [4]समवप्रविभ्यः स्थः (पा० I·iii·22)[5] इत्यात्मनेपदम्। ययौ विमृश्योर्ध्वदिशः [पतिर्न] स्वयंवरं वीक्षितधर्मशास्त्रः। व्यलोकि लोके श्रुतिष्विति पाठान्तरम्। लोके न दृष्टः श्रुतिषु च न श्रुत इत्यर्थः ॥१६॥

[1]श्रुत्वा निजं भीमजया निरासं दूतीमुखादिन्द्रमुखा दिगीशाः।
स्वदे मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः॥१७॥

[2]श्रुत्वा[इति]॥ इन्द्रमुखास्ते दिगीशाः दूतीनां मु(म००)-खात् [3]भीमजया निजं निरासं निराकरणम् आत्मनः श्रुत्वा राज्ञां समाजम् ईयुः। [4]निरस्तमिति पाठे निरसनम्। निरस्तमिति, नपुंसके भावे क्तः (पा० III·iii·114)। ते इत्यत्र त्विति पाठान्तरम्। किं कृत्वा? स्वदे वेगे मुखेन्दौ च चित्तस्य मान्द्यं वितत्य। वेगेन गमने[5] चित्तं मन्दं[6] तथा मुखमपि कलुषम्। भैमीनिरस्तं स्वमवेत्य दूत्या मुखात्किलेन्द्रप्रमुखा इति। सभां [सोमीयुरिति च पाठान्तरम्। परशुभ्योऽन्येषां वृन्दं समाजः॥१७॥

1 P2 ययौ विमृश्योर्ध्वदिशः पतिर्न स्वयंवरं वीक्षितधर्मशास्त्रः। व्यलोकि लोके श्रुतिषु 2 P स्वयं, विमृश्येति। 3 P प्रास्थित; M P om. समव... त्यात्मनेपदम्। 5 P om. इति —॥१६॥ 2 P2 भैमीनिरस्तं स्वमवेत्य दूतीमुखात्किलेन्द्रप्रमुखा 2 P भैमीति। 3 B भीमजाया M P om. निरस्तमिति... पाठान्तरम्। 5 B P मनो 6 B मदे 7 B P दूती° 8 P किलेति 9 P2 om. च 10 P om. परशु... समाज: ॥१७॥

सर्ग १०　　　　10

नलभ्रमेणाऽपि [1] वृणोति भैमी कदाचिदस्मानिति शोषिताशा।
अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥१८॥

नलेति। सा महेन्द्रादीनां चतुष्टयी काचित् अपूर्वा अलीकरूपा [2] चतुर्णां नलानां समाहारश्चतुर्नली अभूत्। किंभूता? इतीदृशी शोषिता आशा यया सा तथा। इतीति किम्? नलस्य भ्रमेण भ्रान्त्याऽपि कदाचिद् भैमी अस्मान् वृणोति। भजेत इति पाठान्तरम्। अनया आशया चत्वारो दिक्पाला नलाः बभूवुः ॥१८॥

प्रयस्यतां तद्भवितुं सुराणां [1] पृष्टेन दृष्टेन परस्परेण।
नैवानुमेने नलसाम्यसिद्धिः स्वाभाविकात्कृत्रिममन्यदेव ॥१९॥

प्रयस्यताम् [इति]। सुराणामिन्द्रादीनां परस्परेण नलस्य साम्यं तस्य सिद्धिर्नैवाऽनुमेने। किंभूतेन? पृष्टेन दृष्टेन च। एकेन तेषां मध्यादपरः पृष्टः "अहं नलसदृशो जातः [2] किम्?" द्वितीयेन दृष्टः। स आह- न त्वं नलसदृशः। इत्थं सर्वेऽपि नाऽनुज्ञातम्। [3] किं कुर्वताम्? अतः सन् । स नलो भवति तद्भवति। च्विप्रत्ययः। तद्भवितुं नलीभवितुं प्रयस्यतां प्रयासं कुर्वताम्। युक्तोऽयमर्थः। स्वाभाविकात् नलरूपात् कृत्रिमं नलरूपम् अन्यदेव विरूपमेव। [4] इति हेतोर्वाक्यार्थतासामान्येन वा समर्थने)- र्थान्तरन्यासः। [5] क्तिः क्तिः (पा० III.iii.९४)। क्त्रेर्मम्नित्यम् (वा० ५।०) इति कृत्तद्धितौ। कात्यायनीये तु कदेव। तद्वैतसिद्धिर्ननु जातु मेने इति पाठान्तरम्। [6] अनुप्रासोऽर्थान्तरन्यासः। पक्षे, हेतुरपि ॥१९॥

1 R ~~+ sa~~ भजेत 2 R adds विसर्गः ॥१८॥
1 R ~~+ sa~~ दृष्टेन पृष्टेन 2 B किल 3 P. किं twice 4 R om. इति.... ०न्यासः)
5 P. वित: 6 R om. अनुप्रासो०... हेतुरपि ॥१९॥

पूर्णेन्दुमास्यं विदधुः पुनस्ते पुनर्मुखीञ्चक्रुरनिद्रमब्जम् ।
स्वपक्ष्ममादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथाऽतिमञ्जु ॥२०॥

[1]पूर्णेन्दुम् [इति] । ते इन्द्रादयः पुनः [2]पुनः [3]पूर्णेन्दुमास्यं [4][विदधुः] चक्रुः [पुनरपि च अनिद्रं विकसितमब्जं मुखीञ्चक्रुः] । अथ स्वपक्ष्मम् आदर्शतले दर्शं दर्शं दृष्ट्वा [दृष्ट्वा] बभञ्जुः । कुतः ? । न तथा नल-प्रकारेणाऽतिमञ्जु अतिमनोज्ञं न । आभीक्ष्ण्ये णमुल् च (पा॰ III.iv.22) इति णमुल् । [6]अनुप्रासो जातिरतिशयोक्तिश्च ॥२०॥

तेषां तदा लब्धुमलीश्वराणां श्रियं निजास्येन नलाननस्य ।
नालं तरीतुं पुनरुक्तिदोषं बहिर्मुखानामनलाननत्वम् ॥२१॥

[1]तेषाम् [इति] । तेषां [2]बहिर्मुखानां बहिः वैश्वानरो मुखं येषां [3]तेषां देवानामनलाननत्वं [4]कर्तृ पुनरुक्तिदोषं तरीतुं [5]नाऽलं [6][न] समर्थं बभूव । किंभूतानाम् ? । तदा । तयेति पाठान्तरम् । नला-ननस्य । नलाननीयामित्यपि पाठः । [7]नलाननस्य सम्बन्धिनीं श्रियं निजास्येन लब्धुमलीश्वराणाम् । अतो[8]ऽनलो [9]वह्निराननो येषां तेषां भावस्तत्त्वम् । इदानीं नलस्याऽऽननत्वं जातम् । अतः पुनरुक्तिदोषः ॥२१॥

1 P1 पूर्णेन्दुम् । 2 B om. पुनः 3 P2 आस्यं पूर्णेन्दुं 4 B P1 P2 om. विदधुः ; edz. add. विदधुः 5 P2 कर्मणि दृशिविदोः साकल्ये (पा॰ III.iv.29) इति णमुल् । 6 P2 om. अनुप्रासो .....शयोक्तिश्च ॥२०॥
1 P1 तेषाम् । 2 P1 बहि॰ 3 P2 ते 4 P2 om. कर्तृ 5 P1 ॰स्तु॰ 6 P1 om. न
7 P1 P2 नलाननसम्ब॰ 8 B ॰नलो 9 B ॰राननो — ॥२१॥

सर्ग १० 12

प्रियावियोग[1]ज्वरितात् किमैलाच्चन्द्राच्च राहुग्रहपीडितात्ते।
ध्मातात्[2]गृहीतैर्मदनाच्च सारैरकल्पयन्त स्वनलानुकल्पम् ॥२२॥

[3]प्रियेति] । ते सर्वे [4]ऐलात् पुरूरवसः सकाशात् इव सारैर्गृहीतैः स्वम् आत्मानं नलस्याऽनुकल्पं हीनकल्पं (140b) किञ्चित्सदृशम् अकल्पयन्त । किं भूतात् ? । प्रियाया उर्वश्या वियोगेन ज्वरितात् । यदा स पीडितः तदा तथाविधात् कस्मात् अचेतनात् सौन्दर्यं गृहीतम् ? । तथा राहु[6]ग्रहणे पीडिताच्चन्द्रादपि गृहीतैः सारैः । तथा ध्मातात् दग्धात् मदनात् [च] सारैर्गृहीतैः । [7]ध्माद्भवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पमिति पाठान्तरम् । मुख्यकल्पेन नलः, अनुकल्पे उक्तविशेषणविशिष्टैलादि[8]-सारनिर्मितं तेषां रूपम् ॥२२॥

नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान् विधिराहृतोऽस्यै ।
स्पर्द्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमूचे ॥२३॥

[2]नलस्य [इति] । विधिर्धाता अस्यै [3]दमयन्त्यर्थम् इति कारणात् [4]भूपान् आहृत[5] । भैमी नलस्य तैः सह इयद् [6]अन्तरं भेदं[7] विशेषं पश्यतु । तथा विधिर्दिगीशान् अपि स्पर्द्धां कारयित्वा तेभ्यः सकाशात् तस्यैव नलस्य प्रथिमानमूचे आख्यत ॥२३॥

1 B text ज्वलित° 2 B text ध्माद्भवेन ... कल्पयन्ति स्म 3 P. प्रिया
4 B ऐडात् 5 B तस्मात् 6 B °ग्रहणे 7 B om. ध्मातात् ... पाठान्तरम् ।
8 B om. उक्तविशेषण° °निर्मितं 9 B P. B °रादि°; edn. °लादि° — ॥२३॥

सभा नलश्रीयमकैर्यमाधैर्नलं विनाभूद्धृतदिव्यरत्नैः।
भामाङ्गणप्राघुणके चतुर्भिः कल्पद्रुमैर्द्यौरिव पारिजाते॥२४॥

सभेति। यमाधैश्चतुर्भिर्नलं विना सा सभा द्यौरिव स्वर्ग इवाभूत। नलश्रियः शोभाया यमकैः सदृशैः। तथा धृतानि दिव्यरत्नानि यैस्तैस्तथा। यथा पारिजाते कल्पद्रुमे व्यक्तिविशेषे भामायाः सत्यभामायाः श्रीकृष्णप्रियाया अङ्गणे प्राघुणके गते सति पार्श्वस्थैश्चतुर्भिः कल्पद्रुमैर्देवद्रुमैर्मन्दारहरिचन्दन-कल्पवृक्षसन्तानाख्यैर्द्यौः शोभितवती। तैरपि धृतदिव्यरत्नैर्नलैः श्रीको बभूवेत्यर्थः। कल्पद्रुमशब्दोऽत्र कल्पद्रुमजातिवाचकः। अयं देव-द्रुमेषु पञ्चस्वपि वर्तमानो जातिवचनस्तथा च, कल्पद्रुमाणामिव पारिजातः (रघु० VI.7) इति, कल्पद्रुमात्परिमला इवेट ... ति च। व्यक्तिविशेषे च सर्वत्र दृश्यते एव। देवद्रुमैरिति पाठान्तरम्। अनु-प्रास उपमा च॥२४॥

तत्राऽऽगमद्वासुकिरीशवासभस्मोपदेहस्फुटगौरदेहः।
फणीन्द्रवृन्दप्रणिधिमानप्रसीदञ्जीवाधेनुजीविवादः॥२५॥

तत्र[इति]। तत्र वासुकिरागमत। किंभूतः। ईशस्य वासात्[ते] भस्मनोपदेहेनोपलेपेन स्फुटं गौरो देहो यस्य स तथा। अतोऽपि गौरः। शम्भुदेहभस्मना पुनरपि गौरः। ईशभूषा-

1 R+ex देव० 2 P. सभा 3 R add. किंभूतैः ॥ h P. om. श्रियः 5 P. आशो० 6 P. पारिजातके 7 B प्राघुणिके 8 R रत्न दिव्यैः 9 R सश्रीको 10 R om. अनुप्रास उपमा च ॥२४॥ // 1 B+ex भस्मो० 2 P. तत्र। R तत्राऽऽ-गमदिति। 3 B गामत 4 B भस्मन 5 R om. ईश०......च्छादित्यर्थः।

सर्ग ४०

14

भस्म इति पाठान्तरम् । अनुपसर्गो वा गामि । ईशापासादित्यनेनैव [च] सम्बध्यते । ईश्वरदेहोद्गाच्छदित्यर्थः । किंभूतः ? । फणीन्द्रवृन्दैः प्रकर्षेण निगद्यमानः प्रसीद जीव जय इत्यादि अनुजीविनां वादो यस्य स तथा । यत् प्रसीदेत्यादि वदन्ति तत्फणीन्द्रैरुच्यमानः । नेर्गदनदपतपदे—(पा० VIII iv.17) इति णत्वम् । अनुप्रास ॥२५॥

द्वीपान्तरेभ्यः पुटभेदनं तत् अणादवापे सुरभूमिभूपैः ।
तत्कालमालम्बि न केन यूना स्मरेषु पक्षानिलतूललीला ॥२६॥

द्वीपान्तरेभ्य इति । सुरभूमेर्मनुष्यागोचरतया देवानामेव प्रचारगोचरतया [च] स्वर्गसदृश्भूमेर्भूपै राजभिः द्वीपान्तरेभ्यस्तत् पुटभेदनं नगरं अणादवापे प्राप्तम् । यतस्तत्कालं केन यूना स्मरस्येषूणां पक्षानिलस्य पक्षवातस्य पक्षवातं प्रति तूलस्य लीला नालम्बि । अपि तु सर्वोऽपि स्मरेषुवायौ सति तूलवत् वेगादागतः । अन्यस्य लीला कथमन्येनाऽऽलम्बत इति । तत्सदृशीत्युपमा वोपमायां पर्यवसानम् । पर्याय ! काव्यलिङ्गं निदर्शना चातिशयोक्तिरनुप्रासोऽपि ॥२६॥

6 B देवद०; P, R दागच्छत् 7 R० जीविनो 8 R om. स 9 B सेव्य० 10 P, पदधुमास्य ~~दि~~ उन्तिवाति द्राति प्साति वपति वहति शाम्यति चिनोति-ति देग्धिषु चेति ॥ B पतद 12 R om. अनुप्रासः ॥२५॥

1 P. द्वीपां 2 R om. मनुष्या०... प्रचारगोचरतया 3 R om. भूमे० 4 B कूलस्य 5 R लीनान् आ० 6 R om. स्मरेषु० 7 B मूल० 8 R om. अन्यस्य ...... प्रासोऽपि ॥२६॥

1 सर्ग १० 15

सपर्यया कुण्डिननाकनाथः शस्तेषु पस्त्येषु निवेशनेन।
प्रियोक्तिदानादरनम्रताभिरुपाचरच्चारु स राजचक्रम् ॥२७॥

2 सपर्ययेति [इति]। स कुण्डिनस्य नाकनाथो 3 राज्ञां चक्रं चारु यथा [तथा] उपाचरत्। कया?। सपर्यया। तथा शस्तेषु 4 प्रशस्तेषु पस्त्येष्वावासेषु निवेशनेन। तथा 5 प्रियस्योक्त्यादानेन आदरेण नम्रतया च 6 ताभिः। नम्रवाग्भिरिति पाठान्तरम्। उपचचार। रम्येषु हर्म्येषु इति पाठे प्रथमा 7 द्वितीयपादयोर्व्यत्यासः। 8 अनुप्रासः समुच्चयश्च ॥२७॥

चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे।
1 दानं दया सूनृतमातिथेयी चतुष्टयी रक्षणसौविदल्ला ॥२८॥

2 चतुःसमुद्रीति [इति]। 3 चेतो नृपाणां 4 वासिता कीर्तिरेव 5 दारा यत्र तथा चतुर्णां समुद्राणां समाहारः सैव परिखा यत्र तत्र [तथा] एवंविधेऽन्तःपुरे इयं चतुष्टयी चतुष्टये 6 रक्षणार्थं सौविदल्लाः 7 महल्लका नाल्लंधराः। का सा इत्याह - एकं तावद्दानम् अपरा दया तथा सूनृतं चतुर्थी 8 आतिथेयी अतिथिपरिचर्या। इयं चतुष्टयी कीर्तिं रक्षति। पथ्यतिथिवसतिस्वपतेर्ढञ् (पा० IV.iv.104)। 9 अन्तःपुररक्षणनियोगे पुंसोऽनधिकाराद्दानमित्यादिनपुंसकत्वेन स्त्रीत्वेन च निर्देशः। रूपकं पूर्वश्लोको-

1 B+ स्व रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः। 2 B सपर्य। 3 B add. इन्द्रः 4 B om. प्रशस्तेषु 5 B तस्मात् 6 B om. ताभिः ... पाठान्तरम् 7 B द्वितीययोः 8 B om. अनुप्रासः समुच्चयश्च ॥२७॥
1 B+ स्व औदार्यदाक्षिण्यदयादमानां 2 B चतु। 3 B यत 4 B पत्रं; B यत्र तत्र चतुर्णां तथा ... रक्षति 5 B om. तथा 6 B om. चतुष्टये
7 B महं० 8 B कीर्ति 9 B om. अन्तःपुर० .... न्यासश्च

तो विशेषोऽन्येन सामान्येन धर्मेण[10] समर्थ्यते इति श्लोकद्वयेनाऽर्था-
न्तरन्यासश्च ॥२८॥

अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु ।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि नाऽऽपापि नृपैर्विशेषः ॥२९॥

[1]अभ्यागतैरिति ॥ परस्परं [परोक्षवृत्तेष्वपि] [2]अनन्योन्यानुभूताचरणेष्वपि तेषु तेषु राजसु मध्ये नृपैर्जिज्ञासितो ज्ञातुमिष्टो यः [3]स्वस्य ईप्सितस्य [दमयन्ती]लाभस्य लिङ्गं चिह्नं भूतः। स स्वल्पोऽपि विशेषो नाऽऽपापि। कैः? कुण्डिनवासवस्याऽभ्यागतैः कृत्वा लक्षणया पूर्वागतैर्भोजनाच्छादनाद्युपचारैः सर्वेषामप्युत्कृष्टैरुपचारैः कस्याऽपि राजश्चित्ते इति नाऽभूत्। यत् ममैवाऽनेन विशेषोपचारलिङ्गेन दमयन्ती भविष्यति। अथवाऽभ्यागतैरिति नृपविशेषणम्। अथवा कुण्डिनवासवस्येति काकाक्षिन्यायेन कुण्डिनवासवस्य परोक्षवृत्तेष्वपि अ[4]ज्ञाताचरणेष्वपि तेषु तेषु राजसु मध्ये नृपैर्जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि विशेषो नापापि। कैः? कुण्डिनवासवस्याऽभ्यागतैः भीम[5]नृपस्याऽप्रत्यक्षेष्वपि उपचारव्यवहारेषु विशेषो नापापि। इति चाऽतिशयोक्तिः ॥२९॥

अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥३०॥

[1]अङ्के [विदर्भ इति]। अहमिति शङ्के। एष राज्ञां समाजो

10 P. साधर्म्येण — ॥२८॥

1 P. अभ्या। 2 P. अनु० 3 B P. तस्य 4 B अन्यतो० 5 B om भीम०...
चातिशयोक्तिः ॥२९॥ || 1 P. अङ्के।

विदर्भेन्द्रपुरस्य अङ्के तथा न [न] संभ्रमौ [अपि तु संभ्रमौ] यथा पयोराशिः अगस्त्यहस्ते भ्रमौ । यथा [वा] मुरारेर्जठरे जगन्ति भ्रमौ । अतिसावकाशमित्यर्थः । [3]अनेन पुरस्य विस्तीर्णता प्रदर्शिता । अनुप्रास उपमा उत्प्रेक्षाधिकं च ॥ ॥३०॥

पुरे पथिद्वारि गृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयैव ।
नभ[1]ोऽपि किर्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥३१॥

[2]पुरे [पथीति] । तत्र पुरे गृहाणि [3]उत्सववाञ्छयैव [4]चित्रीकृतानि [विचित्रितानि] । किंभूतानि? पथि मार्गे द्वारो [ये] [5]ऽन्तः पथिद्वारि । द्वारशब्दोऽयं व्यञ्जनान्तः । तेषां महीभुजाम् आभरणप्रभाभिर्नानाविधाभिः नभ[6]ोऽपि न नभस्तु । नभोऽपि इति[7] पाठे आकाशमपि किर्मीरं चित्रित[ं]मकारि । पथिद्वारि इति व्यस्तं[8] सप्तम्यन्तं पदद्वयम् । मार्गे द्वारदेशे च चित्रीकृतानीत्यर्थः इत्यन्ये । [9]द्वारगृहाणीति पाठे तस्मिन् पुरे मार्गे द्वारगृहाणि प्रवेशगृहाणीति । पथिद्वारगृहाणीति बहुव्रीहिगर्भः समानाधिकरण(म॰ b)स्तत्पुरुषो वा । अतिशयोक्तिः ॥३१॥

विलासवैदग्ध्यविभूषणश्रीस्तेषां [1]तथाऽऽसीत्परिचारकेऽपि ।
वि[2]जानते येन विदर्भजा अमी तथा स्म तं नायकमेव भृत्यम् ॥३२॥

[3]विलासे[ति] । तेषां राज्ञां परिचारकेऽपि [4]भृत्य-

२ B भ्रमौ ३ B om. अनेन..... ऽधिकं च ॥३०॥ // १ B + ख्या नभोऽपि २ P. पुरे ३ B उच्छ्रव॰ M P. विचित्री॰ ५ B तानि ६ P. नभः पुनर्न: B om. नभंयु न नभस्तु ७ B om. इति .... ऽमपि ८ B सप्तम्यन्तं व्यस्तं ९ B om. द्वार॰.... अतिशयोक्तिः ॥३१॥ // १ B + ख्या यथासीत् २ B + ख्या अमासिषु: स्त्रीशिशुबालिशास्तं यथागतं नायकमेव किञ्चित् । ३ P. विलासा P. B नायकमेव .... नदीति पाठः Rest.

मात्रेऽपि विलासस्य वैदग्ध्यस्य [विभूषणानाम्][5] अलङ्करणानां च श्रीः शोभा तथा आसीत्[6] अभूत् । येन[7] विदग्धजा अमी लोकाः तमपि भृत्यमपि नायकमेव विजानते स्म । नायकमेव कञ्चिदिति पाठान्तरम् । तथा असौ[8] क्षितिषु स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कञ्चिदिति पाठः ॥३२॥

[1] न स्वेदिनश्चामरमारुतेन निमेषमात्राः प्रतिचित्रपार्श्वैः ।
म्लानस्रजो नातपवारणेन देवा नृदेवा बिभिदुर्न तत्र ॥३३॥

[2] न स्वेदिन [इति] । तत्र देवा नृदेवाश्च राजानो न बिभिदुः[3] भेदं विशेषं न प्रापुः । तथा[4] चामराणां मारुतेन न[5] [स्वेदिनः][6] स्वेदयुक्ताः । तथा सर्वत्र चित्रैराश्चर्यकरैः[7] पार्श्वैर्न निमेषमात्राः । तथा आतपवारणेन छत्रेण न म्लाना[8] म्लानाः शुष्काः स्रजो[9] येषां ते तथा । देवानां स्वेदराहित्यम् अनिमिषता अम्लानकुसुमता स्वभावतः एवाऽसि । अस्वेदगात्राश्चलच्चामरोघैरमीलन्नेत्राः प्रतिवस्तुचित्रैः । अम्लानमाला विपुलातपत्रैर्देवा नृदेवाश्च भिदां न भेजुः इति पाठान्तरश्लोकः । देवा[10]दिति तु पाठे जात्याख्यायामेकवचनम् । देवेभ्य इत्यर्थः । अतिशयोक्तिः सामान्यं च हेतुरपि ॥३३॥

अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नरेषु वाग्भिः स्वर्गौकसां न जनैरचिह्नि ॥३४॥

5 B।।2 om. विभूषणानाम्; edr. add. विभूषणानाम् 6 ।। अभूत आसीत; ।2 om. अभूत 7 B तेन 8 ।। अन्या०; ।2 आसा० — ॥३२॥ ‖ 1 ।2 + 4x1 अस्वेदगात्रा०... भिदां न भेजुः। 2 ।। न स्वेदिनः। 3 ।2 न ... ।2 add. हि 5 ।2 om. न 6 B।।।2 om. स्वेदिन; edr. add. स्वेदिनः 7 ।।।2 पदार्थैः 8 ।2 om. म्लाना: 9 B स्रजो 10 ।।2 om. देवादिति ... हेतुरपि ॥३३॥

[1] अन्योन्य[ेति]। दिव्यैः समेतेषु [नरेषु] मनुष्येषु राजवर्गेषु मध्ये स्वर्गीयवर्गोऽपि वाग्भिः कृत्वा जनैर्लक्षै[3]र्न अचिह्नि अनुमानेन [नं] ज्ञातः। किंभूतेषु नरेषु?। [4]संस्कृतिमाभिः संस्कृतवाणीभिर्व्यवहारवत्सु [5]व्यवहारं कुर्वत्सु ब्रुवत्सु। व्यवहारवत्स्विति पाठान्तरम्। कुतः?। अन्योन्यं भाषाया अनवबोधस्तत्समुद्भीतेर्भयात्। गौडद्राविडमलयजमहाराष्ट्रगुर्जरमालवादिलोकानां परस्परप्राकृतभाषावबोधाभावात् संस्कृतेन [वदतां] देवानां मा[6]नुषाणां च दैव्या वाच्या भेदाभावः। [7]अतिशयोक्तिः सामान्यं हेतुरपि। अनुप्रासश्च ॥ ३४॥

---

ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि।
निरीक्ष्य निन्युर्दिवसं निशां च तत्स्वप्नसम्भोगकलाविलासैः ॥ ३५॥

---

[1] ते तत्र [इति]। ते [राजानस्तत्र] पुरि भैम्याश्चरितानि चित्राणि नानाप्रकाराणि पौरैश्चित्रे[2] लेखितानि निरीक्ष्य दिवसं निन्युः। तथा निशां च तस्याः स्वप्ने ये सम्भोगकलानां वात्स्या[3]यनोक्तानां गीतनृत्यादीनां [च] विलासैस्तैश्च निन्युः। [4]अन्यस्तु न स्वप्नेति पठित्वा[5] ॥ ३५॥

---

सा विभ्रमं स्वप्नगताऽपि तस्यां निशि स्वलाभस्य ददे यदेभ्यः।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ॥ ३६॥

---

1 P. अन्योन्य। 2 P2 om. नरेषु मनुष्येषु 3 P2 om. न 4 P2 om. संस्कृतिमाभिः 5 P2 om. व्यवहारं कुर्वत्सु 6 B मनुष्याणां 7 P2 om. अतिशयो०... अनुप्रासश्च ॥ ३४॥ // 1 P. ते तत्र।; P2 ते तत्र भैम्या इति। 2 B चित्र० 3 P2 om. वात्स्यायनोक्तानां 4 P2 om. अन्यस्तु ... पठित्वा 5 B P. incomplete verse. ॥ ३५॥

सर्ग १० 20

[1] [सा विभ्रममिति।सा तस्या निशि स्वप्नगताऽपि] यदेभ्यो राजभ्यः स्वल्लाभस्य विभ्रमं विलासम् अथ च भ्रान्तिं ददे[2]। तदर्थिनां भूमिभुजां वदान्या सती सा सती पतिव्रता कामं पूरयति स्म[3] अथवा वदान्या भैमी सती सती साध्वी सती कामं पूरयति स्म।या किल भ्रान्त्या लोभं[4] दत्ते सा कथं वदान्या। कथं वाऽर्थिनां काममभिलाषं पूरयति[5] या च निशि स्वप्ने शयने स्वल्लाभस्य विलासं दत्वा अर्थिनां कामं कन्दर्पं पूरयति तर्पयतीति[6]। सा कथं सती भवतीति विरोधाभासः अनुप्रासश्च[7]॥ ॥३६[8]॥

वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः।
स्वयंवरस्थानजनाश्रयस्तैर्दिनेऽपरत्राऽलमकारि वीरैः॥३७॥

[1] वैदर्भ[ति]। तैर्वीरैरपरत्र दिने स्वयंवरस्थाने जनाश्रयो मण्डपोऽलमकारि भूषितः। किंभूतैः? विदर्भदूतैः अनुनयेन भक्त्योपहूतैः तथा शृङ्गारस्य भङ्गीर्विलासाननुभावयद्भिः प्रापयद्भिः॥३७॥

भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याऽकृत प्राकृतबुद्धिमेव।
प्रसूनबाणे विबुधाधिनाथस्तेनाऽथ साऽशोभि सभा नलेन॥३८॥

भूषाभिः[इति]। अथ तेन नलेन सा[1] सभाऽशोभि। यं वीक्ष्य विबुधाधिनाथो महापुरुषो(?) इन्द्रः प्रसूनबाणे कामे प्राकृतस्य पामरस्य बुद्धिमेवाऽकृत। किंभूते? उच्चैर्भूषाभिः संस्कृतेऽपि। अथ च यत् संस्कृतं भवति तत्कथं प्राकृतं विबुधानां[2] स्याद्दिति विरोधः॥३८॥

1 B P1 om. सा... गताऽपि 2 P2 ददौ 3 P2 om. अथवा...पूरयति स्म 4 B P1 लोभं
5 P2 चार्थि° 6 P2 om. इति 7 P2 om. अनुप्रासश्च॥ 8 P1 35.—॥३६॥
1 B P1 वैदर्भी; P2 वैदर्भेति—॥३७॥ 1 P1 सो शोभा 2 P2 बुधानां —॥३८॥

सर्ग १० 21

धृताङ्गरागे कलितश्रुशोभां तस्मिन् सभां चुम्बति राजचन्द्रे।
गता बताऽक्ष्णोर्विषयं विलङ्घ्य क्व क्षमान्त्राकुलस्य कान्तिः॥२९॥

[1]धृताङ्गे[ति] । तस्मिन् राजचन्द्रे नले सभां चुम्बति सति । बत इत्याश्चर्ये । क्षमाप्येव नक्षत्राणि तेषां कुलस्य कान्तिरक्ष्णो-र्विषयं विलङ्घ्य क्व गता[2] । किंभूते ? धृतोऽङ्गरागो येन तस्मिंस्तथा । किंभूतां सभाम् ? । कलिता[3] द्विः अकारस्य शोभा यया तां तथा । धृतशरीर-रक्तत्वे चन्द्रे दिवि उदिते सति नक्षत्राणि चक्षुर्विषयं नाक्रामन्ति ॥२९॥

द्राग्दृष्टय: क्षोणिभुजाममुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः।
अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दृशोऽशाः[1]॥३०॥

[2]द्राग्दृष्टय इति । क्षोणिभुजां दृष्टयो द्राक् शीघ्र-[3]ममुष्मिन्नस्मिन्नले आश्चर्येण पर्युत्सुकिताः सत्यो निपेतुः । प्राक् दृष्ट्य इति पाठान्तरे पूर्वम् अनन्तरमिति व्याख्या । अनन्तरं[4] दन्तुरिता विषमिता[5] भ्रुवो येस्तेषां तथाविधानां सतां तासां दृशाम् अंशाः अन्ताः[6] कटाक्षा निपेतुः । किंभूताः ? । नितान्तमीर्ष्ययाऽसहनत्वेन[7] कलुषाः । दन्त उन्नत उरच् (पा॰ ५।२।१०६) । अनुप्रासो जातिरत्युदयः । कटाक्षापाङ्गपातिनाम् अवयवा-वयविनोः प्रतिभासभेदात् भेदविवक्षायां पर्यायोऽपि ॥३०॥

सुधांशुरेष प्रथमो भुवीति स्मरो द्वितीयः किमसाविती मम।
दस्रस्तृतीयोऽयमिति क्षितीशाः स्तुतिच्छलान्मत्सरिणो निनिन्दुः॥३१॥

1 P धृताङ्गा । 2 B adds विसर्गः 3 P कल्पिता — ॥२९॥
1 B स्थाने दृशान्ताः 2 P प्राक् 3 B om. अमुष्मिन् 4 B adds. तु 5 B विषमिति
6 B om. अन्ता: 7 B अहस॰ 8 B om. दन्त . . . पर्यायोऽपि ॥३०॥

[1]सुधांशुरिति ॥ क्षितीशाः इमे नलं स्तुतिच्छलान्मत्स-
रिणः सन्तो निनिन्दुः [2]बभर्त्सुः । कथम् ? । इति एष किं भुवि प्रथमः सुधांशुः ।
तथा किमसौ द्वितीयः [3]स्मरः । किम[4]यं तृतीयो दस्रः अश्विनीकुमारः ।
[5]प्रथमद्वितीयतृतीय इति शब्दैः क्रमतो चित्र्यमेवमेवमुत्तरत्राऽपि । यथा ।
आत्मा प्रजानां नयने नृपस्य त्रयीमयज्योतिषि बद्धभक्तिः
चातुर्थिभिः पञ्चशरस्य जेता [षण्णां] गुणानामपि सम्प्रयोक्ता ।
सप्ताङ्गराज्यस्य ललामभूतः प्रकामलब्धाष्टतनुप्रसादो
नवग्रहानुग्रह[6]गौरवेण भूयादसौ चातुर्दशानुबन्धी ॥ ( ? ) इति ।
मयूरोऽपि, एकं ज्योतिरि( सू° श° । ३ )त्यादि बबन्ध । ससन्देहोऽप-
स्तुतिर्व्याजेन चेयं स्तुतिर्वस्तुवृत्त्या निन्दैवेति । व्याजस्तुतिरपि ॥४१॥

आद्यं विधोर्जन्म स एष भूमौ द्वैतं युवाऽसौ रतिवल्लभस्य ।
नासत्ययोर्मूर्तितृतीयता[1]ऽयमिति स्तुतस्तैः कृतमत्सरैः सः ॥४२॥

[2]आद्यं [विधोरिति] ॥ तैः राजभिः कृतमत्सरैः स इति
स्तुतः स एष नलः भूमौ आद्यं विधोः जन्म । असौ युवा रतिवल्लभस्य
द्वैतं [3]द्वितीयाभावः । तथाऽयं नासत्ययोर्मूर्तिस्[4]तृतीयता । [5]किल मत्सरै-
रित्यपि [6]पाठः । व्याजस्तुतिः ॥४२॥

[1]मायानलोद्दाहरणान्निषधस्तैरूचे समाः सन्त्यमुना कियन्तः ।
आत्मापकर्षं किल मत्सराणां द्विषः पर[2]स्पर्द्धनया समाधिः ॥४३॥

1 P₁ सुधांशुः । २ P₁ P₂ बभर्त्सुः निनिन्दुः ३ P₂ मदनः ४ P₂ तथाऽसौ ५ P₂ om. प्रथम°.... व्याजस्तुतिरपि । ६ P₁ गौरवेण — ॥४१॥
1 P₂ text °ताऽसाविति २ P₁ आद्यम् । ३ B द्वितयी°; P₁ द्वितायी° ४ B P₁ तृतीया° ५ P₂ om. किल..... °स्तुतिः । ६ B पाठे — ॥४२॥
1 P₂ text इहेदृशाः .....°वलीतैः । २ P₂ text °स्पर्द्धितया

[3]मायां [नलेति] तैः राजभिर्मायानलानाम् उदाहरणात् दृष्टान्तात् मिथः इति ऊचे। अमुना समाः[4] कियन्तः सन्ति? बहवः तावत् दृश्यन्ते नलास्तैः[5]। कथमित्थं वितर्कः कृत इत्याह- किल यस्मादात्मनोऽपकर्षे हीनतायां सत्यां मत्सराणां[6] मत्सरयुक्तानां द्विषः शत्रोः परस्पर्द्धनयो[9] समाधिः। तेषां नलो द्वेष्यः, रूपेणाऽधिकत्वात्। ततश्च मत्सरेणेन्द्रादीन् [नलान् तत्समान] नलत्वेन[11] दृष्टान्तीकृत्याऽऽत्मनां हीनत्वात् समाधानं चक्रुः। अथवा आत्मापकर्षे[12] इति विषयसप्तमी। तदा आत्मापकर्षे समाधिरिति योज्यम्। अन्ये तु द्विषो द्वेष्टुरात्मापकर्षे सति द्वेष्यमत्सरैः स्पर्द्धनया मत्सराणां समाधिः। (१४२b) मत्सराणामिति बहुवचनेन मात्सर्यातिशयः कथ्यते। अतो[13] मायानलदृष्टान्तेन मात्सर्यं पुपुषुः। इहेदृशाः सन्ति कतीति दुष्टैर्दृष्टान्तितालीकनलावली तैः इति पाठान्तरम्। जातिरर्थान्तरन्यासश्च ॥४३॥

---

गुणेन केनाऽपि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम्।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥४४॥

---

[1]गुणेन [केनेति]। खलु तत्खलत्वं यत् केनाऽपि गुणेन सौन्दर्यादिना अनवद्ये प्रशस्ते जने दोषान्तरस्य प्रकृतानुपयोगि[2]नोऽन्यदोषस्योक्तिर्यत्सुरैस्तस्य नरत्वं मनुष्यत्वम् अदूषि। किंभूतस्य?[3] तस्यां संसदि अदूषितस्य। अथ च स्मृतेर्नलश्रुतिरिति न्यायेन नलत्वमदूषि। अनवद्य[4] इत्यत्राऽधर्मानृतापांशुलानपमेत्यादिवत् नञ् नविरुद्धे

---

3। मायां। ४ B समाः 5 P2 नलैः 6 P1 स्तैः 7 B1 om. इत्थं 8 P2 मात्सर्याणां 9 P2 °नतया 10 P2 om. नलत्वेन 11 P2 om. अथवा... °न्यासश्च॥ 12 B आत्मो° 13 B अन्ये मया —॥४३॥

1। गुणेन। 2 P2 °दोषोक्ति° 3 P2 तस्य रूपेण 4 P2 om. अनवद्य... °न्यासः॥४४॥

वर्तते। दोषान्तरोक्तिरित्युक्तेऽपि तत्खलत्वमिति तदित्यनेन परस्य लिङ्गं गृहीतम्। अमकार। विशेषणसामान्यस्य साधर्म्येण समर्थनादर्थान्तर-न्यासः॥७४॥

---

मिथ्यानलांस्तत्र्यनलो द्विपार्श्वीकृतोपवेशानवदत्सुवेषान्।
उभौ किमैलश्च न दर्पकश्च भवन्ति नासत्ययुतौ[1] भवन्तः॥७५॥

---

मिथ्यानलानित्यादि[2]। त्र्यनलो मिथ्यानलान् सुवेषान् अवदत्[3] अवादीत्। किंभूतान्? द्वयोः पार्श्वयोः समाहारः द्विपार्श्वी तत्र कृतोपवेशान् नलम्[4] अभित उपविष्टान् भवन्तः। उभौ किमैलः पुरूरवा दर्पकः कामश्च न भवन्ति। किंभूतौ[5]? नासत्याभ्याम् अश्विनीभ्यां[6] युतौ। एते चत्वारो यूयं किम्? नलानसत्यानवदत्स सत्यः कृतोपवेशान् सविधे सुवेषान्। नोभावैलभूः किमिति[7] पाठान्तरम्। अनुप्रासः[8]॥७५॥

---

अमी तमी[1]दृग्[1]जगुरत्र मध्ये कस्याऽपि नोत्पत्तिरभूदिलायाम्।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित्॥७६॥

---

अमी[2] [तमीदृगिति]। अमी नलास्तं सत्यं नलम् ईदृक् जगुः[3] ऊचुः। अत्राऽमीषां मध्ये कस्याऽपि इलायां बुधपत्न्याम् उत्पत्तिर्नाभूत्। अपि च इलायां पृथिव्यां[4] देवत्वात्। [तथा वयं ते तव

---

1 P2 om. MS. 2 P2 मिथ्यानलेति। 3 P2 om. अवदत् 4 P2 नलस्य 5 P1 भूमौ 6 P1 अश्विभ्यां; P2 om. अश्विनीभ्यां 7 P2 किमु इति 8 P2 om. अनुप्रासः॥७५॥

1 P2 +ऊ तमाहुः स्म यदत्र 2 P1 अमी। 3 P2 om. विसर्गः 4 P2 पृथ्व्यां——

सविधे समीपे स्थिता: सन्त: अदर्पका: [5] कन्दर्पा: भवाम: । अथ च अदर्पका दर्परहिता: स्म: ।] तथाऽत्र कश्चिदपि नासत्यतां दक्षतां [6] न बिभर्ति । [अथ च] [7] असत्यतां न [8] बिभर्ति । अपि तु बिभर्ति । [9] वक्रोक्ति: ॥७६॥

---

तेभ्य: परान्न: परिकल्पयस्व श्रिया विदूरीकृतकामदेवान् ।
अस्मिन् समाजे बहुषु भ्रमन्ती भैमी किलाऽस्मासु धरिष्यतेऽसौ ॥७७॥

---

तेभ्य [1] [इति] । हे नल! त्वं नोऽस्मान् तेभ्य: [2] एतद्-र्पकाख्येभ्य: [3] परान् अन्यान् परिकल्पयस्व परिभावयस्व [4] । किंभूतान्? । श्रिया विदूरीकृतकामदेवो [5] यैस्तांस्तथा [6] । किल इत्याशायाम् । अस्मिन् समाजे बहुषु भ्रमन्ती सर्वानपि पुन: परीक्ष्यमाणाऽ [7] सौ भैमी अस्मासु धरिष्यते । अथ च हे श्रिया विदूरीकृतकाम ! न: देवान् परिभावयस्व । बहुषु अष्टशोषु पञ्चसु नलेषु भ्रान्तिपरा [9] असौ भैमी अस्मासु धरिष्यते ॥७७॥

---

असाम यन्नाम तवेह रूपं स्वेनाऽधिगम्य [1] श्रितमुग्धभावा: ।
तन्नो धिगाशापतिताञ्जरेन्द्र! धिक्चेदमस्माद्विबुधत्वमस्तु ॥७८॥ । दि

---

असामे [2] [ति] । हे नरेन्द्र! यत् स्वेन त्वात्मना [3] रूपं [4] तवाऽधिगम्य प्राप्य [5] दृष्ट्वा । अथ च कृत्वा नाम अहो वयं श्रितमुग्ध-

---

5 P। कन्दर्पा न 6 P2 om. न 7 P। space for त्यतां 8 P। न न 9 P2 om. वक्रोक्ति: ॥७६॥
1 P2 तेभ्य इति। 2 P2 add. अपि 3 P। space for अभि 4 B °भावयस्व 5 P2 °कृत: 6 P। space for तथा 7 P2 om. असौ ... बहुषु 8 P। space for स्मासु 9 P2 om. असौ — ॥७७॥ 1 P2 text °गत्याश्रित° 2 P। असाम।; P2 असाम यदिति। 3 B भवा:; P2 om. तव 4 P2 तव रूपं 5 P2 om. प्राप्य ... नाम —

भावा इह समाजे असाम भवामः। पञ्चम्यु(उ)त्तमपुरुषबहुवचनम्। अस (पा) भुवि धातुः। मुग्धो मनोहरः। अथ च मुग्धो मूढः। नन्नोऽस्मान् आशा इच्छा तया आपतितान् विबुधत्वं दक्षित्वं च धिक्। अथ च नोऽस्मान् आशाभ्यो दिग्भ्यः पतितान् आगतान् धिक्। अथ च नोऽस्माकम् आशापतितां दिक्पतित्वं धिक्। इदम् अस्माकं विबुधत्वं धिक् अस्तु ॥४८॥

---

सा वागवासावसितमा नलेन तेषामनाशङ्कितवाक्छलेन।
स्त्रीरत्नलाभोचितयत्नमग्नमेनं हि न स्म प्रति भाति किञ्चित् ॥४९॥

---

सा वागिवेति। नलेन सा तेषां वाक् अवीशायितमाम् अवसाता॥ किंभूतेन?॥ तेषाम् अनाशङ्कितं वाक्छलं येन तेन तथा। हि यस्मात् एनं नलं प्रति किञ्चित् वाक्छलादिकं न भाति स्म न स्फुरितम्॥ किंभूतम्?॥ स्त्रीरत्नस्य (143b) यो लाभः तस्योचिते यत्ने प्रयत्ने मग्नम् ॥४९॥

---

यः स्पर्द्धया येन निजप्रतिष्ठां लिप्सुः स एवाऽऽह तदुन्नतत्वम्।
कः स्पर्द्धितुः स्वाभिहितस्वहानेः स्थानेऽवहेलां बहुतां न कुर्यात् ॥५०॥

---

यः स्पर्द्धया [इति]। यो येन सह स्पर्द्धया निजस्याऽऽत्मनः प्रतिष्ठां लिप्सुर्भवति स एव तस्योन्नतत्वमाह। इन्द्रादयो नलेन सह स्पर्द्धमाना एव नलस्योन्नतत्वमाहुः। अतः कः स्पर्द्धितुः उपरि स्थाने

---

6 B P. 2 अस्तु; om. अस 7 P2 ऽस्माकं; and changes the order as नोऽस्माकं ... धिक्।; इदम् .... अस्तु।; अथ च नोऽस्मान् .... धिक्।; अथ आशा इच्छा .. धिक्। 8 P2 om. इच्छा 9 B इह 10 P. om. अस्तु ॥४८॥ // 1 P. अस्तु ॥
2 P. अवज्ञाय० 3 P. एनं 4 P2 add. प्रति— ॥४९॥ // 1 P2 यः स्पर्द्धयेति।——

युक्तं बहुलाम् अव[2]हेलां न कुर्यात् । युक्तार्थं[3] स्थाने इत्यव्ययम् । किंभूतस्य? । स्वेनाऽऽत्मना । अभिहिता स्वस्य हानिर्येन तस्य तथा । अतो नलेन तद्वाक्ये अवज्ञा स्थाने[4] कृता ॥ ५० ॥

गीर्देवतागीतयशःप्रशस्तिः श्रिया तडित्वल्ललिताभिनेता ।
मुदा तदाऽवैक्षत केशवस्तं स्वयंवराऽम्बरमम्बरस्थः ॥ ५१ ॥

[1]गीर्देवता [इति] । केशवः श्रीपुरुषोत्तमः त[2]दा मुदा हर्षेण[3] तं स्वयंवरस्याऽऽम्बरमवैक्षत । अम्बरे आकाशे तिष्ठति यः स तथा । तथा किंभूतः? । गीर्देवतया[4] भारत्या गीता यशसः प्रशस्तिः[5] कीर्तिवर्णना यस्य स तथा । तथा श्रिया लक्ष्म्या हृदयस्थया तडित्वतो विद्युता[6] युक्तस्य मेघस्य ललितं विलसितं तस्याऽभिनेता । लक्ष्म्याः सुवर्णवर्णत्वात् देवस्य कृष्णवर्णत्वात[7] मेघसादृश्यम् । सा[8]मान्योपादाने तडित्वतः कृष्णवर्णत्वमेवेति कविसमयः । अनुप्रास उपमा च ॥ ५१ ॥

अष्टौ तदाष्टासु हरित्सु दृष्टीः सदो दिदृक्षुर्निदिदेश देवः ।
लेभेऽष्टभिर्दृष्टिभिरष्टवाऽपि शिरःश्रियं यो दृष्टौ मृषावादितकौतुकः ॥ ५२ ॥

[1]अष्टौ [तदेति] । स देवो ब्रह्मा तदा अष्टासु हरित्सु दिक्षु अष्टौ दृष्टीः चक्षूंषि निदिदेश । किंभूतः? । स[2]दः सभां दिदृक्षुः[3] । यो

2 P2 हेलां 3 P2 युक्तार्थं० 4 P1 स्थानेऽवज्ञा ; P2 om. स्थाने — ॥ ५० ॥
1 P2 गीर्देवतेति । 2 P1 space for तदा ; P2 om. तदा 3 P2 om. हर्षेण 4 P1 space for तया 5 P1 कीर्तिः प्रशस्तिः ; P2 om. कीर्तिः 6 P1 space for विद्यु० 7 P1 space for त्वात मे 8 P2 om. सामान्यो० ... उपमा च ॥ ५१ ॥
1 P1 space for अष्टौ 2 P2 om. सदः 3 P1 दिदृक्षुः ———

लैङ्गीं लिङ्गस्य श्रीमहादेवस्य शिरसः[4] श्रियं प्राप्तमदृष्ट्वाऽपि दृष्टौ दर्शननिमित्तं मृषा असत्यं वादिता केतकी येन स तथा। ब्रह्मणा परमेश्वरशिरसः पतन्ती केतकी उक्ता[5] त्वया इति भणितव्यम्। यद्दृष्टं ब्रह्मणा मस्तकादानीता। एतदसत्यं त्वया उक्तम्। अतः शापेन मस्तकान्निराकृता। [7]अत्र ओजो गुणोऽनुप्रासो यथासङ्ख्यं च[8]॥५२॥

एकेन पर्यक्षिपदात्मनाऽद्रिं चक्षुर्मुरारेरभवत् परेण।
तैर्द्वादशात्मा दशभिस्तु शेषैर्दिशो दशाऽऽलोकत लोकपूर्णाः॥५३॥

[1]एकेन[इति]। द्वादशात्मा श्रीसूर्यः[2] एकेनाऽऽत्मनाऽद्रिं मेरुं पर्यक्षिपत्, परेणाऽपरेणाऽऽत्मना[3] मुरारेश्चक्षुरभवत्[4]। तैः शेषैर्दशभिरात्मभिस्तु लोकैर्लोकानां वा[5] पूर्णा दश दिशः[6] आलोकत। [7]अनुप्रासो यथासङ्ख्यं च॥५३॥

प्रदक्षिणं दैवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः।
[1]दृष्ट्वा महेन्द्रानुजहृद्विभूत्यां न प्राप तद्दर्शनविघ्नतापम्॥५४॥

[2]प्रदक्षिणमिति]। शर्वरीशश्चन्द्रो दैवतानां [हर्म्य-]माद्रिं मेरुं सदैव प्रदक्षिणं कुर्वन्नपि तस्य स्वयंवर[स्य] दर्शनविघ्नस्य तापं पश्चात्तापं न प्राप। किं भूतः?। महेन्द्रानुजस्य[3] श्रीकृष्णस्य

4 B शिरः° 5 B add. यत् 6 B। त्वया 7 B om. अत्र... यथासङ्ख्यं च। 8 B। एकेन here:—॥५२॥

1 B एकेनेति। 2 B तैः...आलोकत here. 3 B om. परेण 4 B मुरा° 5 B om. लोकानां वा 6 B om. दिशः 7 B om. अनुप्रासो यथासङ्ख्यं च॥५३॥

1 B + ~~दृ~~ दृष्ट्वा 2 B। प्रद। 3 B। महीन्द्रा° ~~B दृष्टा~~

सर्ग १० 29

दृष्टिश्चक्षुः तन्मूर्त्या[4] इष्टा। चन्द्रो द्वितीयं चक्षुः श्रीकृष्णस्य ॥५४॥

आलोकमाना नरलोकलक्ष्मीं तात्कालिकीमप्सरसो रसोत्काः।
जनाम्बुधौ तत्र निजाननानि वितेनुरम्भोरुहकाननानि ॥५५॥

आलोक[मानेति][1]। आप्सरसस्तत्र जनाम्बुधौ स्वयंवरे निजान्याननानि अम्भोरुहाणां काननानि वितेनुः। अम्बुधौ जलाशये किल कमलानि भवन्ति। किं कुर्वाणाः?[3] तात्कालिकीं नरलोकस्य। नरलोकस्येति पाठान्तरम्। लक्ष्मीमालोकमानाः[3] तथा रसेन विलोकनरसेन उत्काः उत्कण्ठिताः ॥५५॥

न यक्षलक्ष्मीः किमलक्षि नो वा सिद्धैः किमध्यासि सभा सशोभा।
सा किन्नरैः किं न रसादसेवि नाऽदर्शि हर्षेण महर्षिभिर्वा ॥५६॥

न यक्षलक्ष्मीरिति]। सा [स]शोभा आप्तशोभा[1] [सभा] किं यक्षाणां लक्ष्मीर्नालक्षि? किं वा सिद्धैर्नाऽध्यासि?। तथा किन्नरैश्च[2] रसादादरात् किं नाऽसेवि?। तथा महर्षिभिर्वा हर्षेण नाऽदर्शि। अपि तु सर्वैरपि वीक्षिता।[3] अलक्षीत्या(१५३b)त्यादिना[4] वीक्षिता ॥५६॥

वाल्मीकिरश्लाघत तामनेकरा[रा]स्त्रयीभूरुहशाजिभाजा।
क्लेशं विना काण्डपथेन यस्य दैवी गिरः प्राग्भुवमागमन्नाक् ॥५७॥

M f2 इष्टा — ॥५४॥
1f1 आलोक। 2 f2 om. नरलोकस्येति पाठान्तरम्। 3 f1 om. विसर्गः — ॥५५॥
1 f2 om. आप्तशोभा 2 f2 कि‍ read 3 f2 om. अलक्षी... वीक्षिता। M B नवीकृता ॥५६॥

वाल्मीकि[1]रिति]। वाल्मीकिस्तां सभाम् अश्लाघत। यस्य कण्ठपथेन दैवी[2] देवी वाक् क्लेशं विना दिवः स्वर्गात् प्राक् पूर्वं पैथरूपा[3] भुवं [द्राक् शीघ्रम्[4]] आगमत्। किंभूतेन?। अनेकाः शाखा यत्र सा[ः] तथा। एतदुक्तं भवति – कण्ठे[5] बह्वृचादिशाखाभिः एकविंशदधि-[illegible] कैकाशीतिशतसङ्ख्याभिर्युक्ता या[6] त्रयी वेदत्रयी सैव भूरुहाणां वृक्षाणां राजि[ः] तां भजते तेन[7] तथा। अन्यत्राऽपि यत्र मार्गे अनेकशाखा वृक्षा भवन्ति तत्र सुखेन[8] गम्यते। मुखमार्ग[9][भो]जीरिति पाठान्तरम्। तदा 'मा निषाद( )इत्यादिरूपा गीरिति व्याख्येया। रूपकं श्लेषश्च॥५७॥

---

प्रारंसि संसद्गुरुणाऽपि चार्वी चार्वाकतासर्वविदूषकेण।
आस्थानपट्टं रसनां यदीयां जानामि वाचामधिदेवतायाः॥५८॥

---

प्रारंसि[1] [इति]। संसद्गुरुणा बृहस्पतिनाऽपि प्रारंसि चार्वी। किंभूतेन?। चार्वाकतया[2] नास्तिकमतेन सर्वस्य सर्वलोकस्य विदूषकेण। गुरुणा[3] दैत्यानां धर्मात् च्यावनार्थं लोकायतमतं कृतम्। अहं यदीयां रसनां[4] वाचाम् अधिदेवतायाः सरस्वत्या आस्थानपट्टं सिंहासनं जानामि[5]। अनुप्रासो[6] रूपकमुत्प्रेक्षा च। विरोधोऽपि॥५८॥

---

नाकेऽपि दीव्यत्यमदिव्यवाचि वचःस्रगाचार्यकविः कविर्यः।
दैतेयनीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत्॥५९॥

---

1 P1 वाल्मीकिः। 2 P1 देवीं दैवी; P2 om. दैवी 3 P2 om. पैथरूपा 4 P1 om. द्राक् शीघ्रम् 5 P1 om. पथेन 6 P1 om. या 7 P2 न 8 P1 मुखेन 9 B सुख°; P2 om. मुख°.....श्लेषश्च॥५७॥ / 1 P2 प्रारंसीति। 2 P2 चार्वाकता नास्तिकता तया कृत्वा सर्वान् विदूषयतीति चार्वाकतासर्वविदूषकस्तेन। 3 P2 om. गुरुणा....अहं 4 P2 add. जिह्वां 5-6 जानाति 6 P2 om. अनुप्रासो....विरोधोऽपि॥
॥५८॥

[1]नाकेऽपि [इति]। स काव्यः शुकः कृत्येन कवि- /का
कर्मणा। [2]वक्ष्यमाणे सभामभाणीत् शुश्राव। किंभूतः[3]? दैत्यजीतेरीश-
नस्याः पथि सार्थवाहः मुख्यो यो [4]नाकेऽपि[5] कविरिति प्रसिद्धः। किंभूते?
दीव्यत्तमा दिव्या संस्कृता वाक् यत्र [6]तत्तथा। यत्र सर्वैरपि[7] संस्कृतवाचा
क्रीडन्ति। तत्र वचसां स्रजो वचनमालाया आचार्यकं वेत्ति। [8]अनुप्रासोऽ-
तिशयोक्तिः॥५९॥

---

[1]तदेव काव्यं दर्शयति।—

अमेलयद्भीमनृपः परं न नाकर्षदेतान् दमनस्वसैव।
इदं विधाताऽपि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्न॥६०॥

---

अमेलय[द्]दिति]। भीमनृप एव केवलं [परम्]
एतान् यूनो [4]नाऽमेलयत्। तथा दमनस्वसैव [5]एता[न्] नाकर्षत्। किन्तु
इदं स्वयंवरस्थानं विचिन्त्य प्रस्तावं भणित्वा विधाताऽपि एतान् यूनः
स्वस्य [6]शिल्पस्य विसागरस्य सर्वस्वं नादर्शयत्। [7]अथवा विचिन्त्य
विचार्य इदं स्वशिल्पसर्वस्वं नादर्शयत्। [अत्र काक्वाऽपि तत्वैनाऽ-
दर्शयदेवेति व्यङ्ग्यम्। वाच्यनिषेध[8]सहभावेन स्थितम्। तेनाऽयमर्थः
सिद्धो भवति। किं न अदर्शयत्] अपितु दर्शयति स्म। काकुवैशिष्ट्यादि

---

1 P2 नाकेऽपीति। 2 P2 om. वक्ष्यमाणे 3 B P1 किंभूतौ!! 4 B योऽनाकेऽपि 5 P2 add. कविः 6 P2 om. तत्तथा। यत्र सर्वैरपि 7 P2 add. तत्राऽपि 8 P2 om. अनुप्रासोऽतिशयोक्तिः॥५९॥

1 B P1 तदेव... दर्शयति abt. अमेलयदिति; P2 om. तदेव...दर्शयति। 2 P2 + txt. एनः 3 P1 ~~[illegible]~~ आमेल्य। 4 P1 एता 5 P2 add. न 6 P1 स्वशिल्पस्य 7 P2 om. अथवा... सर्वस्व० 8 P2 om. सह ~~[illegible]~~

अर्थस्याऽन्यार्थधीहेतुत्वमुक्तम्। यथा वक्तृबोद्धव्यकाकूनामि (का० प्र० III.1,2) त्यादि। [9]नोऽदर्शयन्निति सविसर्गपाठे, अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः (नै० I.40) इत्यादिवत् षष्ठी शेषे (पा० II.iii.50) इति शेषविवक्षायां बद्ध्वा विधाता नः अस्माकमपि[10] [अ]दर्शयदिति व्याख्या। अभिवादिदृशोरात्मनेपदे उपसङ्ख्यानमि (वा० 34) - ति आत्मनेपदे एव विभाषया कर्मोपसङ्ख्यानादत्र च तदभावान्न तु द्वितीया[11]। अतिशयोक्तिरुत्प्रेक्षा च ॥६०॥ 15

एकाकिभावेन पुरा पुरारि[1]र्यः पञ्चतां पञ्चशरं निनाय।
तद्भीसमाधानममुष्य कायनिकायलीलाः किममी युवानः ॥६१॥

[2]एकाकि[इति]। यः[3] पुरारिः पुरा पञ्चशरं कामम् एकाकिभावेन पञ्चतां निनाय मरणं प्रापयत्। अथ च[4] एकाकी भवति स्मर[5]ः, स पञ्चभावं प्रापितः। किम् अमी बहवो युवानः अमुष्य कामस्य (।५५ ७) कायनिकायः शरीरसमूहस्तल्लीलाः[6] तत्सदृशाः। किम्? तस्मात् श्रीमहादेवात् भीर्भयं तस्याः समाधानं सिद्धान्तः। पूर्वमहमनेनै[7]काकी सन् पञ्चतां प्रापितः। इदानीं बहूनि रूपाणि कृतवानस्मि। ततो मम भयं नास्ति [8]इति पञ्चशराशयः। पञ्चतामिति पाठे तस्य पञ्चशरस्य भीः समाधानमिति व्याख्यानम्। अनुप्रास उत्प्रेक्षा च ॥६१॥

पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत् क्वापि निधाय वेधाः।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥६२॥

9 P1 om. नो०; P2 om. नो०...रुत्प्रेक्षा च॥ 10 P1 om. अपि ॥ 11 B द्वितया — ॥६०॥
1 P2 +र्य० र्यत 2 P2 एकाकीति। 3 P2 प्रापत 4 P2 add. च: 5 P2 स्मरः
6 P2 om. किमर्गाः 7 B °मनेनै° 8 P2 om. इति... उत्प्रेक्षा च ॥६१॥

[1]पूर्णेन्दुबिम्बानीति। वेधा अनुमानं भिन्नान् नवनवान् पूर्णेन्दुबिम्बान् क्वाऽपि निधाय अस्थापयत। अहमेवं मन्ये। तैरेव चन्द्रबिम्बैरयं शिल्पी[2] ब्रह्मा लावण्यमयानि अमीषां मुखानि निरमात्[3]। एकशिल्पीति[4] पाठान्तरम्[5]॥६२॥

मुधाऽर्पितं मूर्द्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम्॥६३॥

[1]मुधाऽर्पितमिति। एभिः[2] राजभिर्मूर्द्धसु रत्नं मुधा अर्पितम्। यन्नाम अहो तानि रत्नानि स्वयमेत एव राजान एव। यतः स्वतःप्रकाशे परमात्मनो[3] बोधे सति[4] ज्ञाने सति अन्यद्बोधान्तरं[5] ज्ञानान्तरं[6] स्फुरणार्थमात्मावबोधार्थं नार्थ्यं न प्रार्थनीयम्॥६३॥

प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत्।
न शक्ष्यतो लक्षयितुं विभिन्नौ दस्रौ सहस्रैरपि वत्सराणाम्॥६४॥

[1]प्रवेक्ष्यत इति। यदि दस्रौ अश्विनौ मुदा इदमुच्चैः सुन्दराणां राज्ञां वृन्दं प्रवेक्ष्यतः। तत् परस्परं तैः सह विभिन्नौ सन्तौ दस्रौ वत्सराणां सहस्रैरपि लक्षयितुम् आत्मानं परस्परं ज्ञातुं न शक्ष्यतः[2]॥६४॥

1 P. पूर्णेन्दु। 2 B शल्पी 3 B विरमात् M/2 om. एकशिल्पीति पाठान्तरम्।
5 P. एशल्पीति —॥६२॥

1 B सुधा।; P. मुधा। 2 P. om. विसर्गः 3 P2 परमात्मना M/2 om. सति
5 B अन्या० 6 P2 om. ज्ञानान्तरं —॥६३॥

1 P. प्रवेक्ष्या। 2 B शिक्षितः।; P. शिक्ष्यतः॥६४॥

स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षतिः का।
एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषम् ॥६५॥

स्थितैः [इति] । इयद्भिर्बहुभिर्युवभिः स्थितैः [कामे दग्धेऽपि जगतः का क्षतिः ?। किंभूतैः युवभिः ?। विदग्धैर्दक्षैः । अथ च विदग्धैरदग्धैः अथवा [कितो दग्धः] कामो येभ्यस्तैर्विदग्धैः । यतोऽम्बुराशेः पूर्णस्य मध्यात् एकस्याऽम्बुबिन्दोः [व्ययो]मयं कः शोषस्य दोषं शंसति । तथा कामसदृशा बहवः सन्ति । अनुप्रासोऽतिशयोक्तिर्व्यतिरेकश्च दृष्टान्तः] श्लेषोऽपि ॥६५॥

इति स्तुवन् हुङ्कृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतैव ।
ओङ्कारभूम्ना पठतैव वेदान् महर्षिवृन्देन तथाऽन्वमानि ॥६६॥

इति [स्तुवन्निति] । स शुक्रः कविः इति सभां स्तुवन् गन्धर्ववर्गेण गायतैव सता हुङ्कृतिवर्गणाभिः हुङ्कृतिपरिपाटीभिः हुङ्कारवचनाभिरन्वमानि हुङ्कारेणाऽनुमतः । तथा महर्षिवृन्देन मुनिवर्गेण वेदान् पठतैव सता ओङ्कारस्य भूम्ना बाहुल्येन अन्वमानि । सप्तभिः कुलकम् ॥६६॥

न्यवीविशन्नाजथ राजसिंहान् सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ॥६७॥

1 P2 स्थितैरियद्भिरिति । 2 P2 om. युवभिः 3 B पूर्वस्य 4 B/P2 शोषस्य 5 P2 om. तथा ... श्लेषोऽपि ॥६५॥
1 P1 इति । 2 P2 वर्गेण० 3 P2 om. हुङ्कृतिपरिपाटीभिः हुङ्कार० 4 P2 om. सप्तभिः कुलकम् ॥६६॥

सर्ग १० 35

[1]न्यवीविशदिति] । अथ तान् राजसिंहान् [2]सिंहासना-
नामोघेषु समूहेषु स विदर्भराजो न्यवीविशत् । [3]उपमितं व्याघ्रादिभिः
सामान्याप्रयोगे (पा० II.i.56) इति तत्पुरुषः समासः । सिंहासनमिति रूप्या-
श्रवणात् । राज्ञां सिंहासनेषु निवेशनमुचितमिति उपमा । सिंहानामासनं
सिंहासनमिति योगसमाश्रयणेन सिंहासननिवेशनं रूपकपरिग्रहे
साधनमस्तीति रूपकं वा । रूढिर्योगम् अपहन्ति [इति] उपमैव [4]तु न्याय्या ।
यत्रोपविष्टैरेभिर्नृपैरशोभि । [5]कैरिव ? । कार्तस्वरभूधरस्य शृङ्गेषु त्रिदशै-
रिव । उत्प्रेक्ष्यते । कार्तस्वरभूधरस्य मेरोः शृङ्गेषु स्थितैर्[6]देवैरिव इत्युत्प्रेक्षा
वा । [7]अनु[8]प्रासः उपमा रूपकमुत्प्रेक्षाऽपि वा ॥६७॥

---

विचिन्त्य नानाभुवनागमाँस्तानमर्त्यसङ्कीर्त्यचरित्रगोत्रान् ।
कथ्याः कथङ्कारममी सुतायामिति व्यषादि क्षितिपेन तेन ॥६८॥

---

[1]विचिन्त्य [नानेति] । तेन क्षितिपेन [2]तान् [3]नृनो
विचिन्त्येति व्यषादि । इतीति किम् ? । अमी [4]सुतायां स्वपुत्र्यां विषये कथ-
ङ्कारं कथ्याः कथनीयाः । किं विशिष्टान् ? । नानाप्रकारेभ्यो भुवनेभ्य ना
आगमो येषां तान् (ATMb) तथा । [5]भुवनागतानिति पाठान्तरम् । तथा न
मर्त्यैः सङ्कीर्त्यं चरित्रं गोत्रं च येषां तांस्तथा । [6]अन्यथैवंकथमि-
त्थंसु सिद्धाप्रयोगश्चेत् (पा० III.iv.27) इति णमुल् । अनुप्रासो हेतुश्च ॥६८॥

---

1। न्यवी । 2 B2 om. सिंहान् 3 B2 om. उपमितं .... तु न्याय्या । 4 B तुल्या
5 B2 om. कैरिव ? । ... त्रिदशैरिव । 6 B2 add. त्रिदशैः 7 B2 उपमा वा; and om.
अनु० ... वा । 8 B प्रासो ––– ॥६७॥
1। विच्यन्त्य । 2 BPi इतान् 3 B2 नृपान् 4 B2 add. नृपाः 5 B2
om. भुवना० ... पाठान्तरम् । 6 B2 om. अन्यथैव० --- हेतुश्च ॥६८॥

सर्ग १०  36

श्रद्धालुसङ्कल्पितकल्पनायां कल्पद्रुमस्याऽथ रथाङ्गपाणेः।
तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः ॥६९॥

[1] श्रद्धालुसङ्कल्पितेति]। अथाऽसौ भीमस्तदा आकुलः सन् कुले गोत्रे दैवतस्य[2]ऽधिष्ठातुः कुलदेवतायाः रथाङ्गपाणेः क्षणमात्रम् एकतानः एकचित्तः स्मृतिं ततान। किंभूतस्य? श्रद्धालूनां पुरुषाणां सङ्कल्पितस्याऽभिलषितस्य कल्पनायां दाने कल्पद्रुमस्य। अनुप्रासो[3] रूपकं च ॥६९॥

तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स्म।
स्वयंवरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि! ॥७०॥

[1] तच्चिन्तनेति]। तस्य चिन्तनं स्मरणं तदनन्तरमेव स देवो विष्णुः सरस्वतीं सस्मितम् आह स्म। हे वाणि! अहं त्वाम् अस्मिन् स्वयंवरे राजकस्य राजसमूहस्य गोत्राणाम् अन्वयानां च नाम्नां वृत्तानां[2] चरित्राणां च वक्त्रीं करवाणि। गोत्रं नाम्नि तथाऽन्वये ( ? )। गोत्रोश्ष्ट्रे[3]रिभे (पा० IV ॥ ३५) इत्यादिना ङीष्। अनुप्रासः[4] ॥७०॥

कुलं च शीलं च बलं च यूनां जानासि नानाभुवनागतानाम्।
एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवाऽयम् ॥७१॥

[1] कुलं च शीलं चेति]। हे वाणि! त्वम् एषां राज्ञां[2]

1 P. श्रद्धालु। 2 P2 om. कुलदेवतायाः 3 P2 om. अनुप्रासो रूपकं च ॥६९॥
1 P. तच्चिन्तना। 2 P2 add. च 3 P.P2 om. गोत्रोश्ष्ट्रे... इत्यादिना M P2 om. अनुप्रासः ॥७०॥ 1 P. कुलं च। 2 P2 om. राज्ञां

सर्ग ३० 37

कुलं च शीलं च बलं च नानाभुवनेभ्य आगतानाम् तेषां यूनां जानासि। अतस्त्वम् तेषां वावदूका भृशं [पुनः] पुनर्वा वदनशीला भव। त्वाऽयं मूकीयितुं [कः] समयः। अनुप्रासः काव्यलिङ्गम् उपमा च॥७१॥

जगत्त्रयीपण्डितमण्डितैयं सभा न भूता न च भाविनी च।
शास्रां गुणस्तापनकैतवेन सङ्ख्यावतः श्रावय वाङ्मुखानि॥७२॥

जगत्त्रयीति]। इयं सभा एवं प्रकारेण जगत्त्रयी-पण्डितैस्त्रिभुवनवर्तिविद्वद्भिः मण्डिता न भूता च न भाविनी च। ततो शास्रां गुणानां स्तापनकैतवेन त्वं सङ्ख्यावतः पुरुषान् वाङ्मुखानि निजवाग्विलासान् श्रावय। अनुप्रासो हेतुरपह्नुतिश्च॥७२॥

इतीरिता तच्चरणात्परागं गीर्वाणचूडामणिमृष्टशेषम्।
तस्य प्रसादेन सहाऽऽसयाऽऽसावादाय मूर्ध्नाऽऽदरिणी बभार॥७३॥ 188

इतीरिता [इति]। असौ सरस्वती इति इरिता तस्य चरणात् परागं रेणुं तस्याऽऽसया आदेशेनैव प्रसादेन सह आदाय आदरिणी सती मूर्ध्ना बभार। किंभूतं परागम्? गीर्वाणानां देवानां चूडामणयस्तैर्मृष्टं प्रोञ्छितं तस्मात् शेषम्। पर्यायः सहोक्तिश्च॥७३॥

3 P. त्वविधे॰ 4 P2 नृपाणां 5 P2 om. तेषां 6 P. add. मूकीभवितुं 7 P2 om. अनुप्रासः .. उपमा च॥७१॥ // 1 P2 +ex+ त्तैया 2 P. जगत्त्र। 3 P2 om. न 4 P. न च 5 P2 add. च 6 B त्मुखः नि; P. वा मुखा॰ 7 P. ॰वा विलासान्; P2 ॰वचो 8 BP. आश्रावय 9 P2 om. अनु॰ .. ह्नुतिश्च॥७२॥ // 1 P2 +ex+ दरणी 2 P2 इतीरितेति। 3 P2 om. इति 4 P2 om. परागं 5 P2 om. आसया 6 BP. आसया 7 P2 om. प्रोञ्छितं 8 P2 om. पर्यायः सहोक्तिश्च॥७३॥

इदानीं सकलवाङ्मयशरीरां देवीं प्रतिपिपादयिषुः कविर्मुखादारभ्य चरणपर्यन्तं सर्वश्रुतिस्मृतिशास्त्रमयान्यङ्गानि वर्णयितुमुपक्रमते। —

मध्येसभं साऽवततार बाला गन्धर्वविद्याधरकण्ठनाला।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितहृत्तरङ्गा ॥७४॥

[1] मध्येसभमिति। सा बाला परमेश्वरी सभायां मध्ये मध्येसभं गगनादवततार। किंभूता? गन्धर्वविद्यां [2] [गानविद्यां] धरतीति [3] एवंविधः कण्ठनालो यस्याः सा तथा। गन्धर्वविद्यैव कण्ठः। तथा त्रयी वेदत्रयी तन्मयीभूता वलीनां विभङ्गा यस्याः [सा] तथा। [5] साहित्यविद्या काव्यनाटकादिस्तया निवर्तितो हृत्तरङ्गा यस्याः सा तथा। [6] अनुप्रासोऽतिशयोक्तिश्च ॥७४॥

आसीदथर्वा त्रिवलीत्रिवेदीमूलाद्विनिर्गत्य वितायमाना।
नाभ्यभिचारोचितमेचकश्रीः श्रुतिर्द्वितीयोदरलोमलेखा ॥७५॥

[2] आसीदिति। अथर्वा श्रुतिर्द्वितीयोदरलोमलेखा नवरोमराजिः आसीत्। किंभूता? तिस्रो वलय एव त्रिवेदी तन्मूलात् [3] [वि]निर्गत्य वितायमाना। वेदत्रयमध्यादथर्वा वेदो निर्गतः। अभिचारकर्मबहुलश्च [4]। नाभिं प्रति चारश्चरणं गमनं तदुचिता मेचकश्रीर्यस्या रोमराज्याः सा तथा एवंविधा न भवति, या सा अनाभिचारोचितमेचक—

1 P1 मध्ये। 2 P2 नास्ति 3 P2 om. एवंविधः 4 P2 om. सा 5 P1 om. साहित्य... सा तथा 6 P2 om. अनुप्रासोऽतिशयोक्तिश्च ॥७४॥

1 P2+ed. रोमरेखा 2 P1 आसी। 3 BP1 P2 निर्गत्य; ed. विनिर्गत्य 4 P1 बहुलश्च

श्रीः न[5] तथाविधा। अपितु [सो]नाभिचारोचितमे(145 a)चकश्रीः। [द्वौ हि नञौ प्रकृतमर्थं श्रूतः। अथवा नानाप्रकार[6]भिचारस्य पर[7]द्रोहपरं वचनस्योचितमेचकश्रीः]। हिंसा कृष्णवर्णा भवति। अनुप्रासो रूपकं श्लेषश्च ॥७५॥

---

शिक्षैव साक्षाच्चरितं यदीयं कल्पश्रियाकल्पविधिर्यदीयः।
यस्याः समस्तार्थनिरुक्तिरूपैर्निरुक्तविद्या खलु पर्यणंसीत् ॥७६॥

---

शिक्षैव[1] [इति]। यदीयं यस्या देव्याश्चरितं [साक्षात्][2] शिक्षैव। आत्मा[3] बुद्ध्या समेत्यार्थान्[4] ( ) इत्येवमादिना क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणं पूर्वाह्णमध्यन्दिनापराह्णेषु [च] यथाऽध्येयमधीतस्य स्वरसौष्ठवयुक्तस्य याज्ञकर्मणि प्रयोग( ) इत्येवमाद्यर्थजातनिर्वचनपरं वेदाङ्गमेव[5]। अथ चोपदेशस्तथा। यदीय आकल्पविधि[6]र्मण्डनं कल्पस्य[7] सम्यगधीतस्य परिज्ञातछन्दसोऽमुष्मिन् कर्मणि विनियोग( ) इति प्रवृत्तस्य, यथा इषे त्वे(शु.य. १.१)ति छिनत्ति ऊर्जे त्वेति सं[?]मार्ष्टि ( ) इति, दर्शपूर्णमास आधान[8]ग्निहोत्रादिकर्मकलाप[9]प्रतिपादक[10]ग्रन्थस्य श्रौतस्य स्मार्तस्य श्रिया शोभया विधि[11]। यस्याः खलु इति मन्ये, निरुक्तग्रन्थविद्या समस्तार्थानां या निरुक्तिर्निर्वचनं तद्रूपैः पर्यणंसीत् परिणता।

---

5 P2 तथाविधा न 6 P2 ०प्रकारस्य 7 P2 om. पर०... वचनस्यो० 8 P2 om. अनुप्रासो ... श्लेषश्च ॥७५॥

1 P2 शिक्षैवेति। 2 P1 om. साक्षात् 3 P2 om. आत्मा... ०निर्वचनपरं 4 P1 समर्थो० 5 B add. च 6 P2 ०विधिः 7 P2 om. सम्यग०...०मास आधान० 8 P2 आधानः 9 P1 ०कला० 10 P2 om. ०प्रतिपादक० 11 P2 तथा

यथा सा[12] देवी वाचा पदार्थानां निर्वचनं करोति वदतीत्यर्थः, तच्च[13] निरुक्तिवचनरूपेण परिणतम्। पर्यणंसीत्[14], इति वाक्यत्रये सम्बध्यत इत्यर्थः। तदा[15] तुल्ययोगिताऽपि। अनुप्रासोऽतिशयोक्तिश्च ॥७६॥

---

जात्या च वृत्तेन च भिद्यमानं छन्दो भुजद्वन्द्वमभूद्यदीयम् ।
श्लोकार्द्धविश्रान्तिमयीभिविष्णुपर्वद्वयीसन्धिसुमध्यचिह्नम् ॥७७॥

---

जात्या[1] [चेति]। यस्या देव्या भुजद्वन्द्वं छन्दः[2] इयताऽक्षरकोशेन इयद्भिः पादैर्गायत्री इयद्भिस्त्रिष्टुबित्यक्षरकोशपादव्यवस्थालक्षणपरिज्ञानार्थं वेदाङ्गमभूत्। किंभूतम्? जात्या लसमुद्रगणः[3] इत्यादिकया पिङ्गलोक्त्या। वृत्तं समम[4]र्द्धसमं विषमं चेति गति तदुक्तेन वृत्तेन। वृत्तरत्नाकरे च द्वितीयाध्यायोक्त्या जात्या तृतीयचतुर्थपञ्चमोक्तेन वृत्तेन भिद्यमानं[5] द्विधा भवत्। तदुक्तम् – पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ( १ ) इति। केचित्तु मात्रा वृत्तानुपूर्विकामिह १. इति मात्रा छन्दसामपि वृत्तव्यपदेशं पश्यन्तो व्याचक्षते। संज्ञारूपया[6] गोत्वादिवदनेकव्यक्त्याधारया जात्या गायत्र्युष्णिगादिया वृत्तेन इन्द्रवज्रोपेन्द्रवज्रा[7]प्रभृतिना भिद्यमानम्। पुनः किंभूतम्?[8] श्लोकस्यार्द्धे या विश्रान्तिस्तन्मयीभिविष्णुर्यः पर्वद्वयीसन्धिः[9] कूर्परप्रदेशस्तेन [सुष्ठु][10] भुजमध्यस्य चिह्नं यत्र तत्[11] तथा। सु[12]चिह्नमध्यमिति पाठान्तरम्। अतिशयोक्तिः ॥७७॥

---

12 P2 om. सा 13 P2 तथा 14 P2 om. पर्यणंसीत... ०शयोक्तिश्च। 15 B तथाऽन्योन्योऽ०॥७६॥
1 P1 जात्या। 2 P2 om. इयता०...०ज्ञानार्थं 3 P1 लः 4 P1 सम 5 P2 om. भिद्यमानं 6 B ०रूपा० 7 P2 om. उपेन्द्रवज्रा 8 P1P2 विशिष्टम् 9 P2 om. विसर्गः 10 P1 om. सुष्ठु 11 B तत्र 12 P1 सुविमध्य० ; P2 om. सुचिह्न०......
अतिशयोक्तिः ॥७७॥

सर्ग १० 41

असंशयं सा गुणदीर्घभावकृतां दधाना विततिं यदीया।
विधायिका शब्दपरम्पराणां किञ्चाऽरचि व्याकरणेन काञ्ची ॥७८॥

---

[1]असं[शयमिति]। [2]असंशयं निश्चितं किञ्च अन्यच्च सा यदीया ~~काञ्ची~~ काञ्ची मेखला व्याकरणेन [3]विभक्त्यादिपरिज्ञानार्थेन वेदाङ्गेन अरचि। किंभूता? [4] कृआदिशब्दपरम्पराणां विधायिका निष्पादयित्री। काञ्च्यपि शब्दायते। किंभूता? गुणानां दीर्घाणां भावप्रत्ययानां [5]कृत्प्रत्ययानां विततिं दधाना। व्याकरणे हि क्वापि [गुणः क्वापि] दीर्घः क्वापि भावः क्वचित् [6]कृत्प्रत्ययश्च। मेखला च गुणः कटिसूत्रं तस्य दीर्घभावेन कृतां विहितां विततिं दधाना। [7]अनुप्रासः श्लेषश्च ॥७८॥

---

स्थितैव कण्ठे परिणम्य हारलता बभूवोदिततारवृत्ता।
ज्योतिर्मयी [1]तद्भजनाय विद्या मध्येऽङ्कमङ्केन भृता विशङ्के ॥७९॥

---

[2]स्थितैव [कण्ठे इति]। अहम् एवं (MS D) [3]विशङ्के। कण्ठे परिणम्य स्थितैव ज्योतिर्मयी विद्या श्रुतिचोदितकर्माङ्गभूतकालस्य प्राणिनां शुभाशुभकर्मविपाककालस्य च परिज्ञानार्थं वेदाङ्गविद्या [4]फल हारलता बभूव। किंभूता? उदितम् [5]उक्तं ताराणां नक्षत्राणां वृत्तं चारो यया सा [6]तथा। किंभूता? [7]तेषां नक्षत्राणां भजनाय भागहरणाय मध्ये [8]अङ्कम् अङ्कमध्ये अङ्केन एकद्वित्र्यादिना भृता पूर्णा। [9]ज्योतिषि

---

1 P. असं। 2 P2 असंशयं निश्चितं at the end. 3 P2 om. विभक्त्या... परिज्ञानार्थेन M B भूया; P2 भृता 5 P2 om. कृतप्रत्ययानां 6 P. कृत॰ 7 P2 om. अनुप्रासः श्लेषश्च ॥७८॥ 1 P2 + E? + पद॰ 2 P. स्थितेव। 3 B P, P2 शङ्के; edt. विशङ्के; P2 अहमेवं शङ्के ~~[illegible]~~ 4 P2 om. श्रुति॰ ... वेदाङ्गविद्या [bet. हारलता] 5 P2 om. नक्षत्राणां 6 P2 सा 7 P2 येषां 8 P2 om. अङ्कमङ्कमध्ये 9 P, P2 ज्योतिषे

हि गुणाकारभागाहारैः[10] अङ्काः क्रियन्ते। हारलताऽपि कण्ठे[11] स्थिता
उचितम् उद्धृतं[12] ताराणां मौक्तिकानां[13] वृत्तं वर्तुलत्वं यस्याः सा
तथा। अङ्गस्य वपुषो मध्ये अङ्केनोत्सङ्गेन ध्रियते। ज्योतिर्मयी च।
तस्या भजनाय आश्रयणाय। उत्प्रेक्षा[14] श्लेषश्च ॥७९॥

अवैमि वादिप्रतिवादिगाढस्वपक्षरागेण विराजमाने।
तौ पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूलपती यदीयौ ॥८०॥

[1]अवैमि [वादीति]। अहम् [2]अवैमि। तौ यदीयौ यस्याः
रदनच्छदौ ओष्ठौ [3]पूर्वपक्षशास्त्रं च [उत्तरपक्षशास्त्रं च] ते उभे अपि
भूलपती सञ्जाते[4]। किंभूते। वादिप्रतिवादिनोः गाढो यः स्वपक्षे स्व-
स्वपक्षप्रतिपक्षप्रतिग्रहे[5] रागस्तेन विराजमाने। पूर्वपक्षकृद् वादी।
उत्तरपक्षसमर्थयिता प्रतिवादी। ओष्ठावपि ताम्बूलादिरागेण शोभते।
[6]अनुप्रासः श्लेषश्च ॥८०॥

ब्रह्मार्थकर्मार्थकवेदभेदाद् द्विधा विधाय स्थितयात्मदेहम्।
चक्रे पराच्छादनचारु यस्या मीमांसया मांसलमूरुयुग्मम् ॥८१॥

[1]ब्रह्मार्थकर्मार्थकेति]। यस्या ऊरुयुग्मं मीमांसया
वेदवाक्यविचारेण मांसलं विशालं चक्रे। किं फलम्? परस्य ईश्वरस्य

10 P2 भागाहारौ 11 P2 कण्ठ° 12 P2 om. उद्धृतं 13 P1 वृत्तं मौक्तिकानां
14 P2 om. उत्प्रेक्षा श्लेषश्च ॥७९॥
1 P1 अवैमि। 2 P2 om. अहमवैमि 3 P2 om. पूर्वपक्ष°.... °प्रतिपक्ष° 4 B
सञ्जातौ 5 P2 °परिग्रहे 6 P2 om. अनुप्रासः श्लेषश्च ॥८०॥
1 P1 ब्रह्मा।

आच्छादनं निराकरणं तेन चारु। मीमांसा हि ईश्वरं नाऽनुमनुते। अतश्च परेणोत्कृष्टेनाऽऽच्छादनेन चारु। किं भूतया? ब्रह्मार्थः[3] निवृत्तिमार्गपरः कर्मार्थकः[5] प्रवृत्तिमार्गपरो यो वेदस्तस्य भेदात् द्विधा आत्मदेहं विधाय स्थितया। पूर्वमीमांसाया: उत्तरमीमांसाभेदात् द्विधा भूतयेत्यर्थः। अनुप्रासः श्लेषश्च ॥८१॥

उद्देशपर्वण्यपि लक्षणेऽपि द्विधोदितैः षोडशभिः पदार्थैः।
आन्वीक्षिकीं यद्दशनाद्विमालीं तां मुक्तिकामाकलितां प्रतीमः ॥८२॥

उद्देशपर्वणीति। यस्याः दशनानां दन्तानां द्विमाली अधस्तनोपरितनश्रेणी नाम आन्वीक्षिकी नैयायिकानाम् अध्यात्मविद्यां वयं प्रतीमः। मुक्तिकां मौक्तिकमालाम् आकलितां धृतामिव। अथ मुक्तिकामैराकलिताम्। कैः कृत्वा? षोडशभिः पदार्थैः। किंभूतैः? उद्देशपर्वणि सामान्येन कथने लक्षणेऽपि विशेषलक्षणकथने च द्विधा उदितैरुक्तैः। तथा च न्याये अक्षपादाचार्यसूत्रम् - प्रमाण-प्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्त-अवयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम (न्या.सू. I.1.1) इति। सामान्येनोद्देशः ( १ )। सम्यगनुभव-साधनं प्रमाणम् ( १ )। प्रमाणविषयः प्रमेयम् ( १ ) इत्यादि-विशेषलक्षणानि। उत्प्रेक्षा श्लेषश्च ॥८२॥

2 P2 परणो° 3 P2 om. विसर्गः 4 P2 om. ०पर 5 P2 add. ०च 6 P2 ०मार्गः ०नपरो 7 B वेदं 8 P2 om. अनुप्रासः श्लेषश्च ॥८१॥

1 P1 उद्देश। 2 P1 ०श्रेणीं 3 P1 मौक्तिकां 4 P2 om. आकलितां 5 P2 add. ०नव 6 B ०अवयवि° 7 P2 om. उत्प्रेक्षा श्लेषश्च ॥८२॥

तर्का रदा यद्वदनस्य तर्क्या वादेऽस्य शक्तिः क्व तथा[1]ऽन्यथा तैः ।
पत्रं क्व दातुं गुण[2]शालिपूगं क्व वाऽदतः खण्डयितुं प्रभुत्वम् ॥८३॥

तर्का[3] [रदा इति] यस्या वदनस्य रदा दन्तास्तर्काः प्रमाणानुग्राहकाः तर्क्याः[4] शङ्क्यन्ते। अन्यथा यद्येवं न, उक्तव्यतिरेकेण अस्य वदनस्य तैस्तर्कैः कृत्वा वादे वादकथायां (१५६७) तथा तेन प्रकारेण क्व शक्तिः कुतः सामर्थ्यम्?। तथा तर्कैर्विना पत्रं दातुं पत्रालम्बनं[5] कर्तुं क्व प्रभुत्वम्?। तथा गुणशालिनां प्रतिवादिनां पूगं समूहं वादतो वादात् क्व तर्कैर्विना खण्डयितुं प्रभुत्वम्?। तथा दन्तैर्विना अस्य मुखस्य वादे जल्पने क्व शक्तिः?। तथा पत्रं नागवल्लीदलं दातुं खण्डयितुं दन्तैर्विना क्व प्रभुत्वम्?। गुणशालिपूगं क्रमुकम् अदतो भक्षयतः क्व वा खण्डयितुं प्रभुत्वम्?। अथवा अदतो दन्तरहितस्येत्यर्थः। अनुप्रासः[6] उत्प्रेक्षा श्लेषश्च ॥८३॥

सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभिविष्णु ।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं वर्त्ते पुराणम् ॥८४॥

सपल्लव[मिति] । तन्मत्स्यपुराण[1]पद्मपुराणप्रभृतिभिरुपलक्ष्यमाणं पुराणजातीयं यस्याः[2] तस्याः पाणियुग्मं[3] च[4] वर्त्ते निष्पन्नम्। किंभूतम्?। सपल्लवं सोपाख्यानम्। तथा च व्यासेन श्रीकृष्णद्वैपायनेन पराशरमुनिना च प्रणीतभावात् कृतत्वादुभयीभिविष्णु[5] पाणियुग्मम् अङ्गुलिपल्लवैः सहितं मत्स्यपद्मादिलक्षणरेखाङ्कितं च। रूपकं[6] श्लेषश्च ॥८४॥

1 B+ex विना° 2 B+ex गुणि° 3 P. तर्क्या। M B तर्काः 5 P. add. दातुं 6 B om. अनु°... श्लेषश्च॥८३॥ / 1 B पुराणे 2 B om. यस्याः 3 B P. B युग्मं 4 P. B om. च 5 B P. add. विसर्गः 6 B om. रूपकं श्लेषश्च ॥८४॥

सर्ग ४० 45

आकल्पविच्छेदविवर्जितो यः स धर्मशास्त्रव्रज एव यस्याः।
पश्यामि मूर्द्धा श्रुतिमूलशा[1]लिकण्ठस्थितः कस्य मुदे न वृत्तः॥८५॥

आक[2]ल्प[विच्छेदेति]। यस्याः स धर्मशास्त्राणां मनु-याज्ञवल्क्यप्रभृतिस्मृतीनां व्रजः समूह एव मूर्द्धा [3]मस्तकं मस्तकरूपेण वृत्तः सन् कस्य मुदे वृ[4]त्तो जाऽभूत्। अहमिति पश्यामि शङ्के। किं भूतः? श्रुतिरेव स्मृतीनां मूलं तेन शाली कण्ठो येषां विदुषां तत्र स्थितः। श्शाली कण्ठेति पाठान्तरम्। यः आकल्पं कल्पो ब्र[5]ह्मदिवसः तं कल्पान्तं यावत् विच्छेदेन विवर्जितो वृद्धपरम्परया स्मर्यमाणो मूर्द्धा अपि श्रुतेः श्रो[6]त्रस्य मूलेन शाली यः कण्ठस्त[7]त्र स्थितः आकल्पो मण्डनं तस्य विच्छेदेन रहितो वृ[8]त्तो वर्तुलश्च। उक्तोऽत्र रूपकं श्लेषश्च॥ ॥८५॥

भ्रुवौ दलाभ्यां प्रणवस्य यस्यास्तद्बिन्दुना भालतमालपत्रम्।
तदर्धचन्द्रेण विधिर्विपञ्चीनिक्वाणनाकोणधनुः प्रणिन्ये॥८६॥

भ्रु[1]वौ [इति]। यस्या भ्रुवौ प्रणवस्योङ्कारस्य दलाभ्यां द्वाभ्यां रेखारूपाभ्याम् अर्द्धाभ्यां प्रणिन्ये कृतवान्[2]। तस्य बिन्दुना अनुस्वारेण भाले ल[3]लाटपट्टे तमालपत्रं तिलकं वर्तुलं प्रणि[4]न्ये। त[5]स्या अर्धचन्द्रेण ऊर्ध्वप्रदेशेन विधिः[6] विपञ्च्या वीणा[7]या निक्वाणनार्थं वा[8]दनार्थं कोणधनुः प्रणिन्ये। क्रियाफलस्य कर्त्रभिप्रायत्वादात्मनेपदम्।

1 B +श्श शाली 2 B आकल्प। 3 B om. मस्तकं 4 B om. वृत्तो 5 B om. ब्रह्म० 6 B श्रोतस्य 7 B तत्रा० 8 B om. वृत्तो..... श्लेषश्च॥८५॥
८६. 1 B भ्रुवो। 1 B भ्रुवाविति। 2 B add सम्भानितोवान् 3 B ललाटे 4 B om. प्रणिन्ये 5 B अस्य 6 B क्रियाफलस्य.....ऽपदम् here. 7 B वीणाया
8 B वादार्थं

[9]अकर्त्रभिप्राय[ये]विवक्षायामपि सम्मान[10]नविशेषेण विवक्षायां, सम्माननोत्सञ्जने(पा० I.iii.36)त्यादिना सिद्धमात्मनेपदम्। प्रणवछलाद् भ्रूप्रभृतीनां निर्माणमेव सम्मा[12]ननम्। अनुप्रासोऽतिशयोक्तिस्तुल्ययोगिता च॥८६॥

त्रिकुण्डली वृत्तसमाप्तिलिप्याः कराङ्गुली काञ्चनलेखनीनाम्।
कैश्यं मषीणां स्मितभाः कठिन्याः काये यदीये निरमायि सारैः॥८७॥

त्रिकुण्डली[ति][1]। यदीये[2] काये शरीरे वृत्तानां श्लोकानां समाप्तौ[3] लिपि[स्तस्याः त्रिकुण्डली][4] वर्तुलाकारा पद्मसदृशी [निरमायि]पि निष्पादिता। काञ्चनलेखनीनां सारैः कराङ्गुली तस्याः निरमायि निष्पादिता। मषीणां[5] सारैः कैश्यं केशसमूहो निष्पादितः[6]। केशाच्चाभ्यां यञ्छावन्यतरस्यामि(पा० IV.ii.48)ति यञ्[7]। कठिन्याः खटिकायाः सारैः स्मितभा हास्यकान्तिर्निर्मिता। तुल्ययोगिता[8] अतिशयोक्तिश्च॥८७॥

या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव।
विज्ञानसामस्त्यमयान्तरेव[1] आकारतासिद्धिमयाखिलेव॥८८॥

या[2] सोमेति। या देवी सोमसिद्धान्तो नाम कापालिक[3] दर्शनशास्त्रं तन्मयम् आननं यस्याः[4] सा तथा। अथ च [सोमस्य चन्द्रस्य यः सिद्धान्तः[5] पूर्णत्वं तन्मयानना इव। तथा शून्यात्मतावादे

9 P2 om. अकर्त्रभि०.... ०योगिता च॥ 10 P1 सम्मान० 11 P1 सम्मानितोत्सञ्जिते० 12 P1 सम्मानितम् — ॥८६॥

1 P1 त्रिकुण्डली। 2 P2 ये 3 BP1 add. था 4 BP1P2 om. तस्याः; eds. add. तस्याः 5 P1 मिषीणां 6 P2 निर्मितः 7 P1 यइ 8 P2 om. तुल्ययोगिताऽतिशयोक्तिश्च॥८७॥

1 P2 +eds वा 2 BP1 या सोम। 3 P1 कापालिकं 4 P2 om. विसर्गः 5 P2 om. विसर्गः

सर्ग १० 47

माध्यमिकबौद्धानां शास्त्रं तन्मयम् उदरं यस्याः सा तथा। अथ च]
सर्वथा[6] [शून्यं] नास्त्येव उदरं यस्याः तथाभूता इव, कृश(म) (ध्य)त्वात्।
तथा विज्ञानस्य सामस्त्यं नाम योगाचारबौद्धानां मते 'सर्वं विज्ञानमयं
विश्वं' तन्मयम् आन्तरं मनो[7] यस्याः तथाभूता इव। अथ चान्तरं
विज्ञा[नैर्ज्ञा]नां सामस्त्येन निष्पन्नं, सर्वज्ञत्वात्। तथा अखिलाऽपि देवी
साकारता[8] सिद्धिर्वाऽ[9]थ, केषाञ्चिन्मते सगुणा सालम्बना मुक्तिस्तन्मयी
इव। अथ च मूर्तिमती सिद्धिस्तन्मयी इव। नद्यादेराकृतिगणत्वात् ई-
प्रत्ययाभावः। अथ वा साकारतासिद्धिमयमखिलं यस्या इति समस्तं
पदम्। इत्थं समग्रं देव्याः शरीरं[10] शास्त्रमयं वर्णितम्। [11]उत्प्रेक्षा॥८८॥

---

भीमस्त्वयाऽऽराधित मोदितुं ते बेला किलेयं तदलं विषद्य।
मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम्॥८९॥

---

भीम[1][स्त्वयेति] [2]। पूर्वेण युग्ममिति कश्चित्। भीमो
राजा त्वया आराधित। ते इयं किल[3] मोदितुं वेला। [4]तस्माद् विषद्य
अलं विषादं त्यज। मया एषां जगतीपतीनां गोत्रं चरित्रं च विचित्रं[5]
निगाद्यं वक्तव्यम्। सोपसर्गत्वात् यद्भावे ण्यत्। कात्यायनस्य[6]
च व्ययभावे ह्यण्। [7]अनुप्रासः॥८९॥

---

विन्दत्यसव्ये मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे।
अत्राऽवतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगाऽस्मि काऽपि॥९०॥

---

6 B P। सर्वथाऽन्यं 7 R om. मनो 8 R साकारका 9 R व्नमि 10 R
शास्त्रमयं शरीरं॥ R om. उत्प्रेक्षा ॥८८॥
1 P। भीम। 2 R om. पूर्वेण ... कश्चित्। 3 R add. तव 4 B तस्मात्; R तत्
5 R om. विचित्रं 6 R व्यनीये 7 R om. अनुप्रासः ॥८९॥

[1]विन्दति[इति]। यस्याः[2] असव्ये दक्षिणे चरणारविन्दे मन्दाकिनी मकरन्दस्य लीलां विन्दति प्राप्नोति। अस्मि[3] अहं काऽपि तस्य श्रीपुरुषोत्तमस्य आसा तस्याः[4] ~~[illegible]~~ वशगा[5] सती अत्र रासां गुणवर्णनाय(ऽवतीर्णा(ऽस्मि[6]। अस्मि[7] इत्यव्ययमहमित्यर्थः। अन्यस्तु असत्ये इति पठति व्याचष्टे च। असत्येऽसद्रूपे शून्ये यच्चरणे आकाशे इत्यर्थः। आकाशं हि विष्णुपदम्। तत्र च मन्दाकिनी। अनुप्रासो निदर्शना रूपकमतिशयोक्तिः उदात्तं च ॥९०॥

तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य।
तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश ॥९१॥

[1]तत्काल[वेद्यैरिति]। एष लोकपालैः सह एकधुरीणो नृपतिस्तस्यै[2] उचितां [3]सपर्यां दिदेश। किं कृत्वा[4]? ताम् आप्तां हितकारिणीं मातृसमां[5] काञ्चिदवाप्तां प्रतीत्य। कैः? तत्कालवेद्यैः ज्ञेयैः शकुनानां पक्षिणां स्वराद्यैः शब्दैः कपिञ्जलादिपक्षिशुभरुतैः। आदिशब्दात् दक्षिण[6]बाहुनेत्र[7]स्फुरणादिभिः। अथवा शकुनशब्देन सामान्यतः शकुनशास्त्रोक्ताः शकुना निर्दिश्यन्ते स्वराद्यैरिति विशेष[8]निर्देशः। नृलोकपालैकधुरीण इति पाठान्तरम्। एकधुराल्लुक् चेति(पा° IV.iv.79) ख:। [ख[9]स्य च आयनेयी]नी(पा° VII.i.2)त्यादिना ईन् ॥९१॥ /नी

दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम्।
ततः क्षितीशः स निजां तनूजां मध्ये महाराजकमाजुहाव ॥९२॥

1 P2 विन्दत्यसव्ये इति। 2 B यस्य 3 P2 om. अस्मि 4 P2 om. तस्याः 5 BP1 वशंगता 6 B °पि 7 P2 om. अस्मि..... उदात्तं च ॥९०॥ 1 P1 तत्काल। 2 P2 om. विसर्गः 3 B सपर्याम् उचितां 4 B भूत्वा 5 P2 मातृ 6 P1 दक्षिण° 7 P2 °चक्षुः 8 P2 शेषेण 9 P1 space for खस्य च आयनेयी- ॥९१॥

सर्ग १० 49

¹दिगन्तरेभ्य] इति। ततः स ²क्षितीशो निजां तनूजां मध्ये-
³[महा]राजकं राजमध्ये आजुहाव। किंभूताम्? दिगन्तरेभ्यः सकाशात्
पृथिवीपतीनाम् आकर्षिस्य आकर्षयित् कौतू⁴हलं तस्याः सिद्धविधाम्
गोत्रोक्षोष्ट्रोर⁵भ्रराजे(पा० IV.ii.39) इत्यादिना वुञ्। पारे मध्ये षष्ठ्या वे-
(पा० II.i.18) इति षष्ठीसमासापवा⁶दो विभाषया अव्ययीभावः। तत्सन्नि-
योगेन चैकारान्तत्वं निपात्यते⁷॥८२॥

दासीषु नासीरचमूषु जातं स्फीतं क्रमेणाऽऽलिषु वीक्षितासु।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम्॥८३॥

¹दासीषु[नासीरेति]। षोडशभिः कुलकम्। ²राजराजि-
रिमां पपा(नै० X.104)विति सम्बन्धः। किंभूताम्³? नासीरस्य अग्र-
प्रयाणस्य ~~[struck]~~ चमूषु सेनासु ⁴दासीषु जातं प्रथमोत्पन्नम्।
⁵अग्रदासीनां सेनां दृष्ट्वा उत्पन्नम्। ततः ⁶क्रमेण आलिषु सखीषु
वीक्षितासु स्फीतम्। अथ⁷ स्वाङ्गेषु ⁸स्वस्याऽवयवेषु ⁹रूपोत्थम् अव-
लोककानाम्¹⁰ अद्भुतस्याऽब्धिम् आश्चर्यसमुद्रम् उद्वेलयन्तीं
वेलातिगं ¹¹कुर्वन्तीम्। ततो दमयन्तीं दृष्ट्वा आश्चर्यं निर्मर्यादं बभूवे-
(भाव)त्यर्थः। ¹²रूपकं पर्यायोक्तमतिशयोक्तिश्च॥८३॥

1 P1 दिगन्त। 2 P2 क्षितीशः स 3 P1 om. महा° 4 B P2 कुतू°; eds. कौतू°
5 P2 om. °षो° 6 B °वादः 7 P2 षोडशभिः कुलकम् (X.93) here. —॥८२॥
1 P1 दासीषु। 2 P2 om. राज°... सम्बन्ध 3 P2 भूतासु; and ~~[struck]~~ किंभूतां
... स्फीतम् aft. कुर्वन्तीम् 4 P2 om. दासीषु.... °त्पन्नं 5 P2 अग्रे 6 B उप-
पन्नं 7 P2 om. अथ 8 P2 om. स्वस्यावयवेषु 9 P1 रूपो 10 P2 अद्भुतस्याऽ-
ब्धिम् अवलोककानाम् 11 P1 कुर्वती 12 P2 om. रूपकं.... °शयोक्तिश्च॥
॥८३॥

सर्ग १० 50

स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम् ।
नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिमालाम् ॥९४॥

[1]स्निग्धत्व[मायेति]। पुनः किंभूताम्? स्निग्धत्वेन लेप उपदेहस्तन्मयत्वं मायाजलेन च लोपः[2] स्तिरोधानम्। तौ यथा-सङ्ख्यं यस्यांऽशुकस्य तत्तथा। तथा सयत्नं सशणाया सातिशयं रत्नांशुभिर्मणिकिरणैर्मृजांशुद्धि[3]र्लोके स्वच्छितमिति प्रसिद्धिर्यस्य। ई तच्च तत् अंशुकं वस्त्रं तेन आभा कान्तिर्यस्यास्तां तथा। अथवा स्निग्धत्वमायाजललेपलोपानां सयत्नरत्नांशूनां मृजा सा तद-दंशुकाभा यस्याः [तां] तथा। मृजामन्त्रे[4](?) रक्तं च मांसं बल्लं चे-( ? ) इति मृजाशब्दः सारवचनः। तथा नेपथ्यानामलङ्करणानां ये हीरास्तेषां द्युतिरेव वारि पानीयं तद्वर्ति मध्यवर्ति स्वच्छायं सच्छायं[5] समानच्छायम् आत्मसमानं निजमालिजालं [सखी]कुलं यस्यास्तां तथा। विभाषा सेनेत्(पा॰ II.iv.25)त्यादिना छायान्तस्तत्पुरुषो वा नपुंसकम्। अतितेजसा अदृश्यामिव[6]। तथा सखीनां तस्याश्च भेदा-भाव इत्यर्थः। [7]अनुप्रासो रूपकमुपमाऽतिशयोक्तिश्च॥९४॥

विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च।
रतीशदूतेन मधुव्रतेन कर्णे रहः किञ्चिदिवोच्यमानाम् ॥९५॥

[1]विलेपना[मोदेति]। किंभूताम्? रतीशस्य कामस्य दूतेन मधुव्रतेन कर्णे लगित्वा किञ्चिद्रहो रहस्यम् उच्यमानामिव। किंभूतेन?

1 Pi स्निग्धत्व। 2 Pi लेप॰ 3 B मृजांशु॰ 4 B॰मन्ति; Pi ॰मन्ति; Pi ॰मपि; edi. ॰मन्ने 5 BPi समं॰; Pi om. सच्छायं 6 Pi om. इव 7 Pi om. अनुप्रासो.... ॰शयोक्तिश्च॥९४॥ 1 Pi विलेपना।

विलेपनस्या (ङ्गरागस्या)ऽऽमोदः परिमलः तन्मुदा आगतेन । तथा तस्याः कर्णपूरोत्पलं तत्र सर्पिणा [च] भ्रमरेण[2] ।[3] रूपकमुत्प्रेक्षा च ॥१५॥

---

विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणाम् ।
स्मरस्वचापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीम् ॥१६॥

---

[1]विरोधि[वर्णेति] । किंभूताम् ? । विरोधिवर्णाः पीतरक्तादिवर्णा आभरणानां [ये] अश्मानो मणयः तेषां भासां[2] कान्तीनां मल्लानाम् आजिर्नियुद्धं[3] परस्परं मिश्रीभावस्तस्य कौतूहलम् ईक्षमाणाम्[4] । यथा मल्ला युध्यन्ते तथा मणिकान्तयो मिलिता इत्यर्थः । पुनः किं कुर्वतीम् ? । विलासाद् वलिते[5] वक्रिते भ्रुवौ वहन्तीम् । नु इति वितर्के । स्मरेण कन्दर्पेण स्वचापभ्रमेण भ्रान्त्या [6]चालिते [इ]व ॥१६॥

---

सामोदपुष्पाशुगवासिताङ्गीं किशोरशाखाग्रशयालिमालाम् ।
वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणाम् ॥१७॥

---

[1]सामोद[पुष्पेति] । किंभूताम् ? । तै राजभिरभिलष्यमाणाम् । किंविशिष्टाम् ? । सामोदेन सहर्षेण पुष्पाशुगेन कामेन वासितम् अङ्गं यस्याः तां तथा[2] । तथा किशोरशाखाः कोमलाङ्गुलीकाः अग्रशया हस्ताग्राणि यस्या एवंविधा आलीनां ~~मालां~~ । सखीनां माला पङ्क्तिर्यस्यास्तां तथाविधाम् । कोमलहस्तसखीवृतामित्यर्थः । भूताम् [3]मुख्यार्थबाधे [4]तद्योग (का० प्र० II. 9) इत्यादिवचनात् अवयवावयवि-

---

2 B भ्रमणोरगेन 3 P2 om. रूपकमुत्प्रेक्षा च ॥१५॥ 1 P1 विरोधि । 2 P2 भासा 3 P2 परस्पर० 4 P2 ०माणाम 5 B वलिते 6 P1 वालिते — ॥१६॥ 1 P1 सामोद । 2 P2 om. तथा .... पङ्क्तिर्यस्यास्तां 3 P2 om. मुख्यार्थ०– सम्बन्धात 4 P1 बाधित योग —

नोऽश्च सम्बन्धात् । अत्राऽवयववादग्रमात्रे अवयवे शिखशब्दः[5] । उत्प्रेक्ष्यते-
वसन्तलक्ष्मीमिव[6] । किंभूताम् ? । आमोदानां पुष्पाणामाशुगेन वायुना
वासिताङ्गीम् । तथा कल्पद्रुमैरप्यभिलष्यमाणाम्[7] । तथा किशोराणां
नूतनानां शाखानाम् अग्रेशया स्थिता[8] अलिमाला[9] भ्रमरपङ्क्तिर्यत्र ॥९७॥

पीतावदातारुणनीलभासां देहोपदेहात् किरणैर्मणीनाम् ।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान् पुनरुक्तयन्तीम् ॥९८॥

पीतावदातेति[1] [ ] । किंभूताम् ? । मणीनां किरणैर्देहस्यो-
पदेहात् व्याप्तत्वात् गोरोचनया[2] चन्दनस्य कुङ्कुमस्यैणनाभ्याः कस्तू-
रिकायाश्च विलेपान्[3] अङ्गरागान् पुनरुक्तयन्तीम् । किंभूतानां[4] मणीनाम् ? ।
पीताश्चावदाताः शुभ्राश्चारुणाश्च[5] नीलाश्च भासो येषां तेषां तथा ।
प्रथमं गोरोचनादेरङ्गरागस्ततश्च[6] मणिकिरणैः पुनः कृतः[7] । अ(147b)नु-
~~प्रासे~~ प्रासो यथासङ्ख्यं च ॥९८॥

स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषादृषदंशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीम् ॥९९॥

स्मरं[1] [प्रसूनेनेति] । किं कुर्वतीम् ? । प्रसूनेन शरासनेन[2]
स्मरं नलस्य जेतारम्[3] अश्रद्दधतीम् । अनेन धनुषा नलो जीयते इति
चिन्तयन्तीम् । ततश्च तस्मै कामाय बलद्विष इन्द्रस्य [कार्मुकम् अर्प-

5 P2 om. शब्दः । 6 P2 om. लक्ष्मीमिव.... नूत० 7 P. ०लष्य० 8 P2 om. स्थिता 9 P2
चन्दनस्य कृत्वा ॥९७॥ 1 P. पीता । 2 P2 om. विसर्गः 3 B1 विलेपनात् 4 B1
किंभूतो 5 P2 om. शुभ्रा 6 P2 om. ०राग० 7 P2 कृताः 8 P2 om. अनुः सङ्ख्यं च ॥
1 P. स्मरम् । 2 P2 om. शरासनेन 3 B जाता० 4 P. add. न ———— ॥९९॥

यन्तीम्। किंभूतम्? स्वभूषा दृषदां मणीनां ये अंशवस्तेषां शिल्पम्। मणिकिरणेभ्यः इन्द्रचापं भवति]। कर्मणा उक्तम् (पा० ५।१।१०३)[5] ॥९९॥

विभूषणेभ्योऽवरमंशुकेषु ततोऽवरं सान्द्रमणिप्रभासु ।
सम्यक् पुनः क्वाऽपि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ॥१००॥

[विभू[1]षणेभ्य इति]। किंभूताम्? राजकस्य दृशा सम्यक् पातुं क्वाऽपि न धात्रा[2] विधिना धृतो[3]ऽवकाशो यस्यां तां तथा। क्वचिद् विभूषणेभ्यः[4] सकाशात् वरमधिकम् अंशुकेषु वस्त्रेषु न दत्ताव[5]काशाम्। ततोऽपि[6] अधिकं सान्द्राणां मणीनां प्रभासु न सावकाशाम्। प्रथमं विभूषणैरदृश्यमानां ततोंऽशुकैः[8] ततो[9] मणिप्रभाभिरित्यर्थः ॥१००॥

प्राक्पुष्पवर्षैर्वियतः पतद्भिर्द्रष्टुं न दत्तामथ तद्द्विरेफैः ।
तद्भीतिभुग्नेन ततो मुखेन विधेरहो वाञ्छितविघ्नयत्नः ॥१०१॥

[प्राक्पुष्प[1]वर्षैरिति]। किंभूताम्? प्राग् वियतः पतद्भिः। द्भिः पुष्पवर्षैर्द्रष्टुं न दत्ताम्। अथ तेषां पुष्पाणां द्विरेफैर्द्रष्टुं न दत्ताम्। ततो मुखेन द्रष्टुं न दत्ताम्। किंभूतेन? तेषां भ्रमराणां[2] भीत्या भुग्नेन [3]वलितेन। अहो इत्याश्चर्ये। विधेर्भाग्यस्य[4] वाञ्छितस्य तद्दर्शनस्य विघ्नयत्नः ॥१०१॥

एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गात् कर्पूरकस्तूरिकयोः प्रवाहम् ॥१०२॥

5 P. add. अतिशयोक्तिः ; R add. इत्युक्तम् ॥९९॥ 1 P. विभू। 2 P. धात्री 3 P. दृतो॰ 4 B P. अवकाशात् 5 B ॰नकाशाम् 6 R om. अपि 7 P. स्यव॰ 8 R वस्त्रैः 9 R तदनु — ॥१००॥ 1 P. प्राक्पुष्प ; R प्राक्पुष्पेति। 2 B P. भ्रमरीणां 3 B विलि॰ 4 B महास्थितस्य — ॥१०१॥

[1]एतद्वर स्यामित्यादि। किं कुर्वतीम्? सखीमुखाय अपाङ्गात् [2]नेत्रपर्यन्तात् श्वेतकृष्णरश्मिभिः [3]कर्पूरकस्तूरिकयोः प्रवाहम् उत्सृजतीम्। किंभूताय [4]मुखाय? इति राजकेन मनोरथस्याऽऽतिथ्यमपादिताय। कथम् अहं वरम् एतत्सखीमुखं स्याम् इति राजानो मनोरथान्[5] कुर्वन्ति ॥१०२॥

स्मितेच्छुदन्तच्छदकम्पकिञ्चिद्दिगम्बरीभूतरदांशुवृन्दैः।
आनन्दितोर्वीन्द्रमुखारविन्दैर्मदं नुदन्तीं हृदि कौमुदीनाम् ॥१०३॥

[1]स्मितेच्छुदन्तेति। किंभूताम्? कौमुदीनां हृदि [2]मदं नुदन्तीम्। किंभूताम्? [3]स्मितेच्छू[4] हास्योन्मुखौ यौ दन्तच्छदौ ओष्ठौ तयोः कम्पेन स्फुरणेन किञ्चिद् दिगम्बरीभूता विवृता ये रदानां दन्तानामंशवः किरणास्तेषां वृन्दैः[5]। किंभूतैः? आनन्दितानि उर्वीन्द्राणां मुखारविन्दानि यैस्तैस्तथा। कौमुदी[6] किल कमलानि नाऽऽनन्दयति। [7]अत एव तासां गर्वोच्छेदः। अथ च अंशु[8]शब्देन सूर्य उच्यते। स[9] अरविन्दान्यानन्दयति। कौमुदीनां च हृदि मदं[10] नुदति। मुदमिति पाठान्तरम् ॥१०३॥

प्रत्यङ्गभूषाच्छमणिच्छलेन चलल्लग्नलविश्रव(?)ल्लोकनेत्राम्।
हाराग्रजाग्रद्गुडाश्मरश्मिपीनाभिनाभीकुहरान्धकाराम् ॥१०४॥

[1]प्रत्यङ्गभूषेति। प्रत्यङ्गभूषार्थम् अच्छा निर्मला

1 B. एतद्वरं स्यादित्यादि; P. एतदिति। 2 P. नेत्रान्तात् 3 P. रश्मीन् 4 B. मुखाय 5 P. मनोरथं — ॥१०२॥ 1 P. स्मितच्छुदं। 2 B. मुदं 3 P. om. किं भूतो .... रदानां; and add. कैः? हास्याभिलाषिणां 4 P. स्मितेच्छौ 5 P. om. विसर्ग: 6 P. कौमुद्यः 7 B. एतएव 8 P. अंश 9 P. से 10 B. मुदं — ॥१०३॥
1 P. प्रत्यङ्ग; P. प्रत्यङ्गेति। ———

ये मणयस्तेषां छलेन यत्र लग्नानि तत्रैव निखातानि लोकानां नेत्राणि यस्यां तां तथा। हारस्याऽग्रे जाग्रत:[2] स्फुरन्तो ये गरुडाश्मानो नीला[3] मणयस्तेषां रश्मयस्तै:[4] पीनाभं पूर्णाभं[5] मेदुरकान्तिं नाभी-कुहरान्धकारं यस्यास्तां तथा। नाभ्या: स्वाङ्गत्वेन कुहरान्धकारशोभाया अपि स्वाङ्गता। तमो नाम दशमं द्रव्यमिति औपनिषदं मतम् एतेनाऽभ्युपगतम्। प्रकाशाभावस्तम( ) इति तु वैशेषिकमतेऽनवमम्। अत: प्राणिस्थत्वान्मूर्त्तत्वाच्च स्वाङ्गभावे पीनादेश:[8]। अन्ये तु पीनमिव पीनमित्याहु: ॥१०४॥

तज्ञौरसारस्मितविस्मितेन्दुप्रभाशिर:कम्परुचोऽभिनेतुम्।
विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ॥१०५॥

तज्ञौरेति[1]। विपाण्डुतया मण्डिता: या चामराली[2] सा एव नाना मराल्यो हंस्य:[3] हंसाङ्गना: ताभि: कृता लास्यस्य नृत्यस्य लीला यस्यां तां तथा। किं कर्तुम्? तस्या गौरसारं यत् स्मितं तेन विस्मिता या इन्दुप्रभा तस्या: शिरस: कम्प: तस्य रुच: शोभा[4] अभि-नेतुमिव। [5]तदा यत् स्मितविस्मिता किलेन्दुप्रभा शिर:कम्पं करोति ॥१०५॥

तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम्।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ॥१०६॥

2 B P, स्फुरन्तो जाग्रतो 3 P2 मणयो नीला 4 P2 om. तै: 5 P2 पूर्ण-कान्तिं नाभी° 6 P, P2 add. एव 7 P, °तनवमतम्; P2 °मतमवमतम्
8 B P, पीरा° —— ॥१०४॥

1 P, तज्ञौ 2 P, त्वम° 3 P2 om. हंस्य: 4 P, शोभाम् 5 B कम्पित°; P2 om. तदा यत्स्मितविस्मिता —— ॥१०५॥

[1]तद्गा [इति]। किं कुर्वन्तीम्[2]?। (१४८ a) स्वयं धृतां ह्रियं [स्वो]हृदो मण्डनमप्सरसां प्रसादमर्पयन्तीम्[म्]। किंभूता[नां][3]म्?। तस्या [4]अङ्गानां भोगाव[5]लिर्बिरुदावली तस्या गायनीनाम्। पुनः किंभूतानाम्?। मध्ये गीतमध्ये निरुक्तिक्रमे निर्वचनानुक्रमे कुण्ठि[6]तानाम्। अत एव तासां लज्जा। [7]मागधविरचि[8]तो ग्रन्थो भोगावली। यदाह—तस्य ग्रन्थो हि भोगावली भवेत्। तस्येति मागधः प्रकृतः॥७०६॥

---

तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम्।
आकण्ठमश्रोत्रितयं मधूनि महीभुजः कस्य न भोजयन्तीम्॥७०७॥

---

[1]तारा [इति]। किं कुर्वतीम्?। र[2]दानां रुचा तारा जयन्तीम्[म्]। वदनस्य रुचा चन्द्रं जयन्तीम्। कचानां रुचा नभ आकाशं जयन्तीम्। तथा कस्य महीभुजोऽश्रोत्रितयम् आकण्ठं मधूनि न भोजयन्तीम्[म्]?। अपि तु भोजयन्तीम्[म्]। [3]मधूनि च, [ग]तिबु[4]द्धि-प्रत्यवसानार्थ (पा० I. iv. 52) त्यादिना कर्म॥७०७॥

---

अलङ्कृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम्।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः॥७०८॥

---

[1]अल[ङ्कृ]तेति]। अथ राज्ञां [राजिः] इमां विमानेन सभां विशन्तीं [सतीम्] अपाङ्गैः [पपौ]। किंभूताम्?। अलङ्कृताङ्गाद्

---

1 P2 तद्गोति। 2 P1 कुर्वतीम् 3 P1 भूताम् 4 B अङ्गानां 5 P1P2 ०वली० 6 B कुण्ठिता० 7 P2 om. मागध०... प्रकृतः 8 P1 ०विचारितो—॥७०६॥ 1 P2 तारेति। 2 B रदनां 3 P2 om. मधूनि.... कर्म 4 B P1 P2 बुद्धिप्रत्यव०; edn. गतिबुद्धिप्रत्यव०—॥७०७॥ 1 P1 अलं॥ 2 P2 विसन्तीं ——

सर्ग १० 57

अद्भुतं केवलम् अनलङ्कृतम् अङ्गं यस्याः तां तथा। तथा स्तवाद् वर्णनात् अधिका अध्यक्षेण] [3]प्रत्यक्षेण निर्वेद्या लक्ष्मीर्यस्याः तां तथा। स्तुतेः सकाशात् प्रत्यक्षेण रमणीयाम् ॥१०८॥

आसीदसौ कोऽपि न तत्र भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य।
उल्लेसुरङ्गानि मुदा न यस्य विनिद्ररोमाङ्कुरदन्तुराणि ॥१०९॥

[1]आसीद[साविति]। तत्र स्वयंवरे असौ कोऽपि भूपो न आसीत् यस्याङ्गानि तस्या मूर्तेः [2]रूपात् उद्भवतोऽद्भुतस्य मुदा हर्षेण [न] उल्लेसुः। किं भूतानि]? । विनिद्रैः रोमाङ्कुरै दन्तुराणि[3] विषमाणि। तन्मूर्तीत्यादि यस्येत्यस्य विशेषणं वा। दन्त उन्नत उरच् (पा० V.ii.106) ॥१०९॥

अङ्गुष्ठमूर्ध्नाऽवनिपीडिताग्रा मध्येन भागेन च मध्यमायाः।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥११०॥

[1]अङ्गुष्ठ[इति]। तत्र नाम [2]स्वयंवरे केन जनेन तर्जन्यङ्गुलि[3] अङ्गुष्ठमूर्ध्ना मध्यमायाः अङ्गुल्या मध्यमेन च[4] भागेन भैमीमवलोक्य[5] नाऽऽस्फोटि। अपि तु [6]आस्फोटि। किंभूता? । [7]अवनिपीडितमग्रं यस्यास्तर्जन्याः सा तथा। अवनिपीडिताग्रमध्येनेति [8]प्रायिके पाठे अधस्तान्निपीडितमग्रं मध्यं च यस्येति भाग-

3 P2 om. प्रत्यक्षेण —॥१०८॥ 1 P1 आसीद।; P2 आसीदिति। 2 B विनिद्र०
3 B P1 दन्तुरितानि —— ॥१०९॥
1 P2 अङ्गुष्ठेति। 2 P1 P2 सम्बोधने; edn. स्वयंवरे 3 P1 अन्याङ्गुली प्रदेशिनी
4 P1 भागेन च; 5 P2 मध्यमभागेन 5 P2 चावलोक्य 6 P2 स्फोटिता 7 P2 अवनी०
8 P2 प्रायिकेन ——

विशेषणं समस्तम्। अङ्गुष्ठमूर्धा[1] चेति पाठान्तरम्। न्यापटी वादिनेत्यर्थः॥ ॥११०॥

समुच्चयेऽस्मिन् मनुजेश्वरेण तां खञ्जनाक्षीमवलोक्य केन।
पुनः पुनर्लोलितमौलिना न भ्रुवोरुदक्षेपि[1]तरां द्वयी वा ॥१११॥

अस्मिन्[2] [इति]। वा अथवा समुच्चयेऽस्मिन् समाजे केन मनुजेश्वरेण राज्ञा भ्रुवोर्द्वयी न उदक्षेपितराम् उत्क्षिप्ता। किं कृत्वा? तां[3] खञ्जनाक्षीम् अवलोक्य। किंभूतेन? पुनः पुनर्लोलितो मौलिर्मस्तकं येन तेन तथा ॥१११॥

स्वयंवरस्याऽजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः।
इदं मुदा विह्वलचित्तभावादवादि खण्डाक्षरजिह्मजिह्वम् ॥११२॥

स्वयं[1][वरस्येति]। अथ भूमिनाथैः भैमीं स्वयंवरस्याऽजिरमाजिहानां विभाव्य[2] ज्ञात्वा मुदा इदम् अवादि। कथं यथा? खण्डैरर्धोक्तैरक्षरैर्जिह्मा जिह्वा यत्र तद्यथा भवति। कुतः? विह्वलचित्तस्य भावात् ॥११२॥

रम्भादिलोभात् कृतकर्मभिर्वा[मा] शून्यैव भूर्भूत्सुरभूमिपान्यैः।
इत्येतयाऽलोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् ॥११३॥

रम्भादि[1][लोभादिति]। एतया दमयन्त्या दिवः पुंसा-

१ B °मूर्ध्ना; R om. अङ्गुष्ठ°... पाठान्तरम् ॥११०॥
1 R + ex. °पेक्षि° 2 R अस्मिन्निति। 3 P. om. तां 4 B अञ्जना° — ॥१११॥
1 P. स्वयम्; R स्वयमिति। 2 R व्यभाव्य — ॥११२॥ 1 P. रम्भादि; R रम्भादीति।

सर्ग १० 59

मपि रसायां पृथिव्यां विषये वैमत्यं[2] विदुषमतित्वम्[3] इति कारणाद्-लोपि। किंभूतया? अतिक्रान्ता[4] अप्सरसो यया [तया] तथा। इतीति किम्? कृतं कर्म यज्ञादिकं यैस्तैः सुरभूमेः पान्थैः सद्भिः भूः पृथिवी शून्यैव मा भूत्। कस्मात्? कृतकर्मभिः रम्भादीनां लोभात्[5]। देवाः किल स्वर्गस्था भूमिं निन्दन्ति। ततस्ते भैमीलोभेन भुवमागताः। अतोऽन्यस्याऽपि स्वर्गगमने औत्सुक्यं निवर्तताम्। विमतिशब्दस्य दृढादिपाठात्, वर्णदृढादिभ्यः ष्यञ्चे (पा॰ V.i.123)ति ष्यञ् प्रत्यये वैमत्यमिति[6] ॥११३॥

---

रूपं यदाकर्ण्य जनाननेभ्यस्तत्तद्दिगन्तादहमागमाम।
सौन्दर्यसारादनुभूयमानादस्यास्तदस्माद्बहु नाकनीयः ॥११४॥ /स्मा

---

रूपमिति[1]। वयं जनानामाननेभ्य[2] इति यत् रूपम् आकर्ण्य तस्मात् दिगन्तादागमाम[3]। [4]अद्यतन(1486)ने लुङ्। अस्या दमयन्त्या अस्मात् प्रत्यक्षादनुभूयमानात् सौन्दर्यसारात् सकाशात् तत्[5] श्रूयमाणं रूपं बहु नाकनीयः अतिशयेन न्यूनम् अल्पम्[6]। युवाल्पयोः कनन्यतरस्याम्(पा॰ V.iii.64)ति कन्। अन्यत्र किल दृष्टात् श्रुतं रमणीयम्। अत्र तु श्रुताद् दृष्टमधिकम् ॥११४॥

---

रसस्य शृङ्गार इति श्रुतस्य क्व नाम जागर्ति महानुदन्वान्।
कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ॥११५॥

---

रसस्य[1] [इति]। नाम अहो शृङ्गार इति श्रुतस्य

---

2 B वैषम्यं 3 P. दुधिरमतित्वं 4 P. थता 5 B P. लोलेन 6 P. वैमित्यः—॥११३॥
1 P. रूपम्।; R रूपं यदेति। 2 R om. इति 3 B आजगाम; R अगमाम 4 R om. अद्यतने लुङ् 5 B ततः 6 R om. अल्पम्—॥११४॥ 1 P. रसस्य।; R रसस्येति।

प्रसिद्धस्य रसस्य महानुदन्वान् समुद्रः क्व जागर्ति ? क्वापि तिष्ठतीत्यर्थः । अन्यथा कस्मात् पयोधेरियं श्रीः[2] लक्ष्मीः उदस्थात् ? किंभूता ? लावण्यस्य[3] वैदग्ध्यस्य [च] निधिः । कार्येण हि कारणमनुमीयते ॥११५॥

साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुरं लाक्षणिकः शशाङ्कः ।
एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥११६॥

साक्षात्[1] [इति] । भैम्या मुखमेव साक्षात् अव्यवधानेन सङ्केतविषयो[2] मुख्यः सुधांशुः स्फुरन्नित्यहं मन्ये । दिवः[3] [ः] शशाङ्को दिवि इति पाठे दिवि हि[4] यः [शशाङ्कः सत्लाक्षणिको लक्षणया सान्तरार्थनिष्ठया वृत्त्या, न तु अभिधया । अथ च लक्षणेन लाञ्छनेन निष्पन्नः] शशाङ्कत्वात् । तथा एतस्या भ्रुवौ मुख्यम् अनङ्गचापम् । भ्रुवौ हि[5] मुखे भवत्वात् मुख्यत्वम् । मुखमिव हस्ताद्यवयवेभ्योऽर्थान्तरेभ्यः प्रथमं प्रतीयमानो मुख्योऽर्थः । तदुक्तम् - शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता । अर्थात्[6] पुनर्लक्ष्यमाण[त्व]-[7] मिष्यते ( ? )॥ लक्षणा भेदो गुणवृत्तिः[8] । यत्पुनस्तस्य पुष्पलक्षणं चापं तद्गुणमात्रवृत्त्या गौण्या वृत्त्या । अथ यत् किल चापं भवति तद्गुणोऽपि [मौर्व्यो वर्तते] । अर्थान्तरवृत्तिः[9] ॥११६॥

लक्ष्यं धृतं कुण्डलिके सुदत्या ताटङ्कयुग्मं[1] स्मरधन्विने किम् ।
सव्यापसव्यं विशिखा विसृष्टास्तेनाऽनयोर्यान्ति किमन्तरेव ॥११७॥

२ P₂ om. श्रीः 3 B लावण्यस्त — ॥११५॥

1 P₁ साक्षात् । ; P₂ साक्षादिति । 2 B ०योम्मुखः 3 P₂ om. दिवः ... पाठे
4 P₂ om. हि 5 P₂ च 6 P₂ वासयस्य 7 P₁ ०लक्ष्य० 8 P₂ ०वृत्तिय० 9 P₁
वृत्तिः ॥११६॥ 1 P₂ ताडङ्क०

[2]लक्ष्यम् [इति]। किं सुदत्या दमयन्त्या [3]ताटङ्कयुग्मं कर्णाभरणं स्मर इव धन्वी तदर्थं [4]द्वे कुण्डलिके लक्ष्यं धृतम्। ततस्तेन स्मरेण सव्यापसव्यं वामदक्षिणतः [5]उभयथा विसृष्टा विशिखा [6]इव [अ]नयोः कुण्डलिकयोरन्तरे[व] मध्ये इव किं [7]यान्ति। अतस्तद्दर्शनं कामोद्दीपनम् ॥११७॥ /का

---

तनोत्यकीर्तिं कुसुमाशुगस्य[1] सैषा बतेन्दीवरकर्णपूरौ।
यतः श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता तमाभ्याम् ॥११८॥

---

[2]तनोति[इति]। बत खेदे। [3]सैषेति परोक्षसमीपतरवर्तिनोस्तदेतच्छब्दयोर्जहदजहल्लक्षणया सामानाधिकरण्यम्। [4]सैषा दमयन्ती इन्दीवरकर्णपूरौ [5]नीलोत्पलकर्णावतंसौ कुसुमाशुगस्य कुसुमायुधस्याऽकीर्तिं तनोति। [6]इन्दीवरकर्णपूराभ्यां कामस्याऽकीर्तिरारोप्यते। अत्र वाक्यार्थं कारकं हेतुमाह। यत् आभ्याम् इन्दीवर- /त कर्णपूराभ्यां साधनाभ्यां खलो दुर्जनस्तं कुसुमाशुगं [7]श्रवसी कर्णलते इव कुण्डलिके ताभ्यामपराद्धो लक्ष्यात् [8]च्युतः शरो यस्य [9]तं तथा [10]एवंविधं [11]ख्यापयिता [12]ख्यापयिष्यति। [13]श्रवःकुण्डलिकयोरुपरि इन्दीवरकर्णपूरयोः सद्भावादपराद्धेषु च ख्यापनम् ॥११८॥

---

2 P. लक्ष्मम्।; P2 लक्ष्यमिति। 3 P.P2 ताडङ्क० 4 P. कुण्डलके 5 B [illegible] उभयत 6 P.P2 एव तयोः 7 P2 यान्तीति— ॥११७॥

1 P2 + ext ०युधस्य 2 P. तनोति।; P2 तनोतीति। 3 P2 om. सैषेति.... सामानाधिकरण्यम् 4 P2 add. उत्प्रेक्ष्यते 5 P2 om. नीलो०.... ०शुगस्य 6 P2 om. इन्दीवर०.... लक्ष्यात् 7 B श्रवसी 8 P2 यतः 9 B P. स तथा 10 P2 om. एवं 11 P. ख्यापयिष्यति 12 P2 कथयिष्यति 13 P2 कर्णपूरौ हि कर्णयोरुपरि भवतो, न तु मध्ये। अतः शरस्खलनं शङ्के ॥११८॥

रजःपदं षट्पदकीटजुष्टं हित्वाऽऽत्मनः पुष्पमयं पुराणम् ।
अधाऽऽत्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥११९॥

---

[1]रजःपिदमिति]।[2]स आत्मभूः कामो [3]रजसः परागस्य पदं तथा षट्पदा एव कीटा घुणास्तैर्जुष्टं सेवितम् आत्मनः पुष्पमयं पुराणं चापं [हित्वा अध नूतनं भैम्या भ्रूयुग्मं चापं धनुराद्रियताम् ।) किंभूतम् ? । अन्तर्धृता मुष्टिर्मुष्टिसंस्थानमाकृतिविशेषो येन तत्तथा । किल पुराणं चापं] रजःपदं घुणजुष्टं [4]हीयते । नूतनं चाऽन्तर्धृतमुष्टि[5][6]राद्रियते । [7]इहैकत्र क्रमेणाऽनेकवर्णनेऽपि आत्मभुवः पुराणनूतनचापवि[8]षयगृहीतोपादानयोर्विवक्षितत्वात् परिवृत्तिरुक्ता भवति ॥११९॥

---

पञ्चान् हिमे प्रावृषि खञ्जरीटान् क्षिप्नुर्यमादाय विधिः क्वचित्तान् ।
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयम् ॥१२०॥

---

[1]पञ्चानिति]। विधिः [2]स्रष्टा ब्रह्मा [3]तान् प्रसिद्धान् अनुभूतान् वा हिमे [4]हेमन्ते पञ्चान् प्रावृषि वर्षासु खञ्जरीटान् यं सारमादाय[5] (५१९) क्वाऽपि क्षिप्नुः । क्षिपतिलच्छोलादिषु क्नुः ( ? )। तेन [6]सारेण [7]प्रतिवर्षं [8]प्रतिवत्सरम् उच्चैरतिशयेन एतदीयं दृष्टिद्वयं पुष्णाति । [9]अत एवाऽधिकाधिकशोभा खलु लक्ष्यते ॥१२०॥

---

1 P. रजः। 2 P2 अध here. 3 P2 om. रजसः ... नूतनं 4 P. कीटक 5 B हीयते 6 B °राद्रि° 7 P2 om. इहैकत्र .... भवति 8 P. °विषयहीतो° — ॥११९॥ 1 P. पञ्चा। 2 P2 om. स्रष्टा 3 P2 om तान् ... खञ्जरीटान् 4 B हिमन्ते 5 P2 add. हिमे सति एतान् पञ्चान् क्वचित् क्षिप्नुः। तथा प्रावृषि सारमादाय, खञ्जरीटान् क्वाऽपि निक्षिपति। न लोकाव्ययनिष्ठाखलर्थतृनामि (पा० II. iii. 69) ति खलात्। कौमारे च नुप्रत्ययस्य उदन्तत्वे निष्ठादिपाठात् कर्मषष्ठ्या अभावः। 6 P2 add. गृहीतेन 7 P2 add. ब्रह्मा 8 P2 om. प्रतिवत्सरं 9 P2 om. अत ... लक्ष्यते ॥१२०॥

एतद्दृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ।
इतीव धाताऽकृत तारकालिस्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥१२१॥

---

[1][एतदिति]। धाता स्रष्टा[2] इह[3] [अक्षि]युग्मे इतीव इति कारणादिव तारके[4] एव कनीनिके एवा[ऽ]लिस्त्रीपुंसौ[5] भ्रमर-मिथुनं तयोर्माध्यस्थ्यम्[6] अन्तर्वर्तित्वम्[7] [अकृत]। अथ च औदासी[8]-न्यम् अपृच्छत। अच्चतुरविचतुरे (पा० V.iv.77) त्यादिना अच्। इतीति[9] किम्?। जनो लोक एतस्या[10] दमयन्त्या दृशोरम्बुरुहे[11] कमले[12]-विशेषं भेदं व्यतिरेकं[13] भृङ्गो[14] च भृङ्गी च भृङ्गौ पृच्छतु। किंभूतौ?। तेषामम्बुरुहाणां गुणज्ञौ। पुमान्स्त्रिया (पा० I.ii.67) इत्येकशेषः। भ्रमरो हि कमलगुणं जानाति। विवादे हि मध्यस्थ उदासीनः पृच्छ्यते ॥१२१॥

---

व्यधत्त सौधे रतिकामयोस्तद्गतं वयोऽस्या हृदि वासभाजोः।
तदग्रजाग्रत्पृथुशातकुम्भकुम्भौ न सम्भावयति स्तनौ कः ॥१२२॥

---

[1]व्यधत्त [इति]। वयो यौवनं [कर्तृ][2] रतिकामयोः सौधे[3] प्रसादद्वयं व्यधत्त। रतिशब्दस्य, द्वन्द्वे घि[4] (पा० II.ii.32) रिति पूर्व-त्वम्। किंभूतम्?। तद्गतं रतिकामाश्रितम्। किंभूतयोः?। अस्या हृदि वासं[5] भजन्तीति [एवंशीलयोः][6]। किल सेवको भक्तो भवति। स स्वामिनो रुचिरं स्थानं कुरुते। अत्राऽनुमानमाह— यतः इमौ स्तनौ कः पुमान्

---

1 P1 om. एतदिति। 2 P2 धर्मा 3 P2 add. अस्मिन् 4 P2 om. एव 5 P2 add. च
6 B P1 मध्य° 7 P2 °र्गत° 8 P2 मध्यस्थतां सभ्यत्वम् अकृत; and om.
अच्चतुर०.... अच् 9 P1 इति किम्? 10 P2 om. दमयन्त्या 11 B अनुरूपैः;
P1 om. अम्बुरुहैः 12 P2 मरुत् 13 P2 om. ~~[illegible]~~ व्यतिरेकं 14 P2 भृङ्गास्त्र— ॥१२१॥
1 P2 व्यधत्तेति। 2 P1 om. कर्तृ 3 P1 संधे 4 P1 घिरिति 5 P2 वासभाजोः 6 P2
om. एवंशीलयोः —

तयोः प्रसादयोरग्रे[7] जाग्रतौ पृथु[8] शातकुम्भस्य सुवर्णस्य कुम्भौ कलशौ न सम्भावयति ? । कलशदर्शनात् सौधानुमानम् ]॥१२२॥

अस्या भुजाभ्यां विजिताद्बिसात् किं पृथक्करोऽगृह्यत तत्प्रसूनम् ।
इहेक्ष्यते तन्न गृहाः श्रियः कैर्न गीयते वा कर एव लोकैः ॥१२३॥ /र्न

[अस्या[1] भुजाभ्यामिति । अस्या भुजाभ्यां विजितात् बिसात् किं तस्यौ] बिसस्य[2] प्रसूनं कमलं पृथक् पृथक् करो[3] [अगृह्यत दण्डे] अगृह्यत[4] । तत्कमलम् इह भुजद्वयाग्रे कैर्न[6] ईक्ष्यते । किंभूतम् ? । श्रियः शोभायाः गृहाः स्थानम् । [5]गृहाः पुमांसो भूम्न्येव (अमर० ॥॥5) । कैर्वा लोकैः कर एव न गीयते । यतो हस्तोऽपि कर उच्यते । कमलं लक्ष्म्याः सदनम् ॥१२३॥

छद्मैव तच्छाम्बरजं बिसिन्यास्तत्पद्ममस्यास्तु भुजाग्रसद्म ।
उत्कण्टकादुद्गमनेन नालादुत्कण्टकं शातशिखैर्नखैर्यत् ॥१२४॥

छद्मैव[1] [इति] । बिसिन्याः[2] सम्बन्धि तच्छाम्बरजं पद्मं यदुच्यते तच्छद्मैव व्याजमात्रम् । शाम्बरी[3] माया विद्यते । अथ शम्बरादुदकाज्जातम् । तु पुनस्तत्पद्मं[4] हस्तलक्षणं पद्मम् अस्याः भुजाग्रसद्म । कारणानुगुणं हि कार्यम् । अतो यदुत्कण्टकात् नालादुद्गमनेन कृत्वा[5] उत्कण्टकम् । कैः ? । शातशिखैस्तीक्ष्णाग्रैर्नखैः[6] ॥
॥१२४॥

7 P2 अग्रे तौ 8 P1 पृथौ — ॥१२२॥ / 1 P1 अस्या । 2 P2 om. बिसस्य
3 B P1 करौ 4 B P1 स्पृष्ट 5 Oxi. गृहाः पुंसि च भूम्न्येव ; P2 om. गृहाः...
भूम्न्येव 6 P1 भूम्नेव —॥१२३॥ / 1 P2 छद्मैवेति । 2 B शिबिन्याः
3 P2 add. हि 4 P2 om. पद्मं 5 B P1 यतो 6 B P1 ०शखैः —॥१२४॥

सर्ग १० 65

जागर्ति मर्त्येषु तुलार्थमस्या योग्येति योग्यानुपलम्भनं नः।
यद्यस्ति नाके भुवनेऽथ बाधस्तदा न कौलस्कृतलोकबाधः ॥१२५॥

जागर्ति[1] [इति] । अस्यास्तुलार्थं योग्या मर्त्येषु मनुष्येषु काऽपि जागर्ति विद्यते इत्यत्र नोऽस्माकं योग्यानुपलम्भनम् अभावः प्रमाणम् । यथा इह भूतले घटो नाऽस्ति । दर्शन[योग्यत्वे][2] सति [3]अनुपलम्भात् । प्रत्यक्षानुमानोपमानागमार्थापत्तिलक्षणप्रमाणपञ्चकेनाऽज्ञायमानत्वात् । अतो मनुष्यलोकेऽन्या काचिन्नाऽस्त्येव । तर्हि लोकद्वये[4] भविष्यतीत्याह । यदि नाके भुवने स्वर्गेऽथ वा अधो भुवने पाताले [वा] वा अस्ति योग्या, तदा कौलस्कृता लोकास्तेषां बाधोऽत्यन्तसम्मर्दो न स्यात् । कुतः कुतः स्थानादागताः कौलस्कुताः । अथवा अनुपलम्भनं नेत्यविसर्ग[5]पाठे योग्यानुपलम्भनं न [इति][6] काक्वाक्षिप्तत्वेन योग्यानुपलम्भनमेव व्यङ्ग्यम् । वाच्यनिषेधसहभावेन स्थितम् । तदयमर्थः — किं योग्यानुपलम्भनं न ? । अपि तु योग्यानुपलम्भनमभाव एव । एवमभावमभिधायाऽनुमानमर्थापत्तिं वा दर्शयति । यदि नाकेऽधो भुवने [7]पाताले वा स्यात् तदा तेषां लो(M96)कानां [8]किं बाधा प्रतिषेधः न स्यात् ? । अपि तु स्यात् । तेनाऽऽगच्छेयुः[9] । अत्राऽपि बाधो न [इति][10] [11]काक्वाक्षिप्तत्वेन बाध[12] एवेति व्यङ्ग्यम् । वाच्यनिषेधसहभावेन स्थितम् । कौलस्कुतशब्दस्य कस्कादिपाठात्, कस्कादिषु चे(पा० VIII iii 48)ति वीप्सायां सः ॥१२५॥

1 P2 जागर्तीति । 2 B श्रुति 3 P1 उप० MP1 om. न ; P2 नस्ति नेत्याह 5 B add. विसर्गः 6 P2 om. इति ... ०लम्भनं न 7 P2 om. पाताले 8 P2 om. किं 9 B गच्छेतुः 10 P1 om. इति 11 B काक्षिप्तत्वेन 12 P2 वा —— ॥१२५॥

नमः करेभ्योऽस्तु विधेर्न वाऽस्तु स्पृष्टं धियाऽप्यस्य न किं पुनस्तैः।
स्पर्शादिदं स्यात्कुलितं हि शिल्पं मनोभुवोऽनङ्गतयाऽनुरूपम् ॥१२६॥

[1]नम [इति]। विधेः करेभ्यो नमोऽस्तु। वा अथवा न अस्तु मा भवतु। यतो[2]ऽस्य ब्रह्मणो धियाऽपि [3]दमयन्तीलक्षणमिदं /स्य शिल्पं न स्पृष्टम्। किं पुनस्तैः करैः स्पृष्टम्? न स्पृष्टमित्यर्थः। हि यस्मात् इदं शिल्पं स्पर्शात् कुलितं मलिनं [4]चिपिटं वा स्यात्। इदं शिल्पं मनोभुवोऽनङ्गतया [अनुरूपं] योग्यम्। [5]अनुप्रास [आक्षेपोऽनुमानमतिशयोक्तिः॥१२६॥

इमां न मृद्वीमसृजत्कराभ्यां वेधाः कुशाध्यासनकर्कशाभ्याम्।
शृङ्गारधारां मनसा न शान्तिविश्रान्तिधन्वाध्वमहीरुहेण ॥१२७॥

[1]इमां [नेति]। वेधा इमां कुशानां दर्भाणाम् अध्यासनेन कर्कशाभ्यां कराभ्यां न असृजत। यतो मृद्वीं कोमलाम्। तथा ब्रह्मा एनां मनसाऽपि न असृजत। यतः शृङ्गारस्य धारां श्रेणीम्। किंभूतेन? शान्तेरुपशमस्य विश्रान्त्यर्थं धन्वाध्वनि मरुदेशमार्गे महीरुहेण। यत्र शमविभ्रमः तत्कथं शृङ्गारमयीं सृजति। [2]यत्र मरुमार्गकृशः तत्कथं धारां [3]सृजति। अनुप्रासो विषमं रूपकमतिशयोक्तिश्च ॥१२७॥

उल्लासस्य धातुस्तुलिता करेण [1]श्रोणावियं किं स्तनयोर्गुर्वी।
तेनाऽन्तरालैस्त्रिभिरङ्गुलीनामुदीतमध्यत्रिवलीविलासा ॥१२८॥

1 P2 नमः करेभ्य इति। 2 B0 स्ये 3 P2 इदं दमयन्तीलक्षणं 4 P2 om चिपिटं वा 5 P2 om. अनु० .... ०शयोक्तिः॥१२६॥/ 1 P. इमाम्। 2 P. यच्च; P2 om. यत्र .... ०शयोक्तिश्च। 3 P. सृजन्ति — ॥१२७॥/ 1 P2 text श्रोणौ किमेषा

[2] उल्लासस्य [इति] । इयं धालुः करेण उल्लासस्य उत्पाथ तुलिता । किम्[3] इयं श्रोणौ कटिदेशे[4] गुरुरथ वा स्तनयोर्गुरुः इति । तेन कारणेन[5] चतसृणाम् अङ्गुलीनां त्रिभिरन्तरालैर्गृहीते मध्ये उदरे तिसृणां वलीनां विलासो यस्यां सा तथा ।।१२८।।

निजामृतोद्यन्नवनीतजाङ्गमेतां[1] क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाऽभून्निद्रालुना दुर्धरमम्बुजेन ।।१२९।।

[2] निजा[मृतेति] । इन्दुरेतां कृत्वा अस्या आत्मना मुखम्[3] अभूत । किंभूताम् ? । निजादमृताद्दुग्धोदुत्पद्यमानं यत नवनीतं [तस्माज्जातमङ्गं यस्यास्तां तथा । अत एव क्रमेण उन्मीलितः पीतिमा यस्यास्तां[4] तथा । नवनीतं] पश्चात् पीतत्वं भजते । यतोऽस्या मुखं निद्रालुना अम्बुजेन दुर्धरम् ।।१२९।।

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि पुष्पैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ।।१३०।।

अस्या [इति] । अस्याः स[1] चारुर्मनोरमो[2] मधु-वसन्त एव कारुः शिल्पी[3] मलयानिलेन श्वासं वितेने । तथा अमूनि अङ्गकानि स पुष्पैर्विदधे । तथा पिकस्य पञ्चमेन शब्देन वाचमस्याश्चकार ।।१३०।।

२ P2 उल्लासस्येति । 3 P2 इयं किं 4 P2 ०प्रदेशे 5 P1 add. चतस्य —।।१२८।।
1 P2+P4 ०मेमां 2 P1 om. निजामृतेति । 3 B मुख्यम् 4 P2 om. तथा —।।१२९।।
1 P1 om. स 2 P2 मनोज्ञो 3 P2 add. ततः —।।१३०।।

कृतिः स्मरस्यैव न धातुरेषा नाऽस्या हि शिल्पीतरकारुजेयः।
रूपस्य शिल्पे वयसाऽपि[1] वेधा निर्जीयते स स्मरकिङ्करेण॥१२१॥

[2]कृतिरिति। एषा स्मरस्यैव कृतिर्न धातुः [हि][3] यतोऽस्याः यः शिल्पी स इतरैः कारुभिर्जेयो न भवति। यतो[4] रूपस्य शिल्पे स वेधाः स्मरस्य किङ्करेण दासमात्रेण वयसा यौवनेनाऽपि [5]निर्जीयते। यौवनेन हि शरीरं कार्यं बाल्याद् विशिष्टं[6] [7]सृज्यते॥१२१॥

गुरोरपीमां भण दोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम्।
श्रमः स्मरस्यैष[1] भवं विहाय मुक्तिं गतानामनुलापनाय॥१२२॥

[2]गुरोरिपीति[3]। एष स्मरस्य श्रमः [4]कृतिः। स्मरस्यैवेति क्वचित्पाठे इयं स्मरस्यैव कृतिः। किं कर्तुम्? गुरोर्बृहस्पतेरपि [5]ओष्ठौ च कण्ठं च। द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (पा० II. iv. २) इति प्राण्यङ्गानां समाहारत्वादेकत्वम्। ओष्ठकण्ठं विनेतुं शासितुम्। कया? निरुक्तौ वचने यो गर्वः तस्य च्छिदया लोपेन। किं कुर्वद् ओष्ठकण्ठम्? इमां दमयन्तीं [6]भणद् वर्णयत्। अस्या वर्णने[7] बृहस्पतिरप्यशक्त इत्यर्थः। तथा भवं संसारं विहाय (१५०a) त्यक्त्वा[8] ये मुक्तिं गतास्तेषाम् अनुलापनाय स्मरस्य श्रमोऽयं कृतिरियम्। यथा तेषां[9] पश्चात्तापो भवति॥१२२॥

1 I2+ext विधाता 2 I कृति 3 B I2 om. हि; ed. add. हि 4 B om. यतो 5 B निर्जी० 6 I विसृष्टं 7 B युज्यते॥१२१॥
1 I2+ext स्मरस्यैव 2 I गुरो 3 I2 om. एष... पाठे 4 I कृतिः श्रमः; I2 om. श्रमः 5 B ओष्ठकण्ठम् 6 I I2 भणन् वर्णयन् 7 B वर्णने यो गर्वः ... अस्याः twice 8 I2 om. त्यक्त्वा 9 I2 om. तेषां — ॥१२२॥

आख्यातुमक्षिव्रजसर्वपीतां भैमीं तदेकाङ्कनिखातदृक्षु[1]।
गाथासुधाश्लेषकलाविलासैरलंचकाराऽऽननचन्द्रमिन्द्रः ॥१३३॥

आख्यातु[मिति][2]। इन्द्रो गाथा काव्यान्येव[3] सुधा तत्र (?) यः श्लेषः शब्दालङ्कारस्तस्य कलाया विलासैराननं चन्द्रम् अलंचकार[4]। किं कर्तुम्? तदेकाङ्कनिखातदृक्षु[5] विलोकनपरेषु भैमीमाख्यातुं वर्णयितुम्। किंभूताम्? अक्षिव्रजैः सहस्रसङ्ख्यैः सर्वामपि पीताम्[6]। निखातचक्षुरिति[7] पाठे किंभूत इन्द्रः? तस्या एकस्मिन् केवले अङ्के वपुष्येव निखातानि चक्षूंषि येन स तथा। अथ चन्द्रः सुधाया आश्लेषेण कलानां[8] विलासैरलङ्क्रियते ॥१३३॥

स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा।
हेमैव कायप्रभयाऽऽशेषैस्तन्वी[1] मतिं क्रामति मेनकाऽपि ॥१३४॥

स्मितेन[इति][2]। इयं दमयन्ती स्मितेन गौरी अप्सरो[3]-विशेषः। अथ च गौरी गौरवर्णा। दृशा हरिणी नामाऽप्सरोविशेषः। अथ च हरिणी मृगी। सुस्वरकण्ठभासा[4] कान्त्या वीणावती नाम अप्सरो[5]-रत्नम्। अथ च वीणावती परिवादिनी युक्ता। कायस्य[6] प्रभया हेमा[7] अप्सरोविशेषः मता। श्रिया एव। अथ च हेम एव सुवर्णमेवाऽशेषै[8]-मेनकाऽपि तन्वी अप्सरःश्रेष्ठा मतिं क्रामति बुद्धिस्था भवति। अथ च काऽपि तन्वी मे[9] मतिं न[10] क्रामति न स्पृहणीया। तन्वीमतिक्रामति इति

1 P2 चक्षु। 2 BP1 व्याख्यातुम्। 3 B कथान्येव 4 P1 अलङ्कार 5 P2 om. तदेका°... °परेषु 6 P1 तां 7 P2 om. निखात°... पाठे 8 P1 नलानां — ॥१३३॥
1 P2 + ex. °मतिक्रामति 2 P2 स्मितेनेति। 3 BP1 अप्सरसो° 4 BP1 सुस्वर° 5 P2 om. नाम... वीणावती 6 P2 वदनं तथा 7 P2 अप्सरसः अथ च 8 P2 °विशेषैः 9 P2 add. मम 10 P2 न मतिं —

[पाठे अङ्गारा][11]मेनका नामाऽप्सरसां वराऽपि इमां किम् अतिक्रामति?। अपि तु न। अथ [च] इमां तन्वीं मे मम काऽपि न अतिक्रामति।[12]मेनकेति छान्दसम[13]पि प्रायः कविभिः कथ्यते। तथा छान्दसत्वं वार्तिककार आह – नरिमन्योरल्लि[14]येत्वं छन्दस्य[15]मिपचोरपि।[16]धनशर्म्मेनका चाऽस्य धेसानं त्रिदिवे चरन् ( १. )॥ श्लेषोऽतिशयोक्तिश्च ॥१३४॥

---

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन।
व्याकृत्य मर्त्यौचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम् ॥१३५॥

---

[1]इति [स्तुवान इति]।आ[2]खण्डलस्तस्य नलस्य शङ्कां नुनोद। किंभूतः?। इति पूर्वोक्तश्लोकेन सविधे स्तु[3]वानः सन् [नलेन विलोकितः। किंभूतेन?।] किमयमिन्द्र इति शङ्कितमानसेन। किं कृत्वा नुनोद?। उक्ते[4]ः स्मितेन गौरी[5](नै० ८।३४)ति श्लोकोक्ते[6]-मर्त्यानामुचितमर्थं व्याकृत्य। इयं गौरवर्णा हरिणी मृगी वीणायुक्त-[कण्ठी इत्यादिकमर्थं व्याख्याय।[8]न पुनरिन्द्रौ[9]चित[10]मर्थमप्सरसो वाचकशब्दानामर्थं[11] व्याख्यातवानिन्द्रः।[12]अनुप्रासः ॥१३५॥

---

स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः स[1]न्।
किं स्यानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः ॥१३६॥

---

[2]स्वं नैषधा[देशमिति]। अहो इत्याश्चर्ये। स इन्द्रः

---

11 Pi add अपि 12 Pi om. मेनके०...०शयोक्तिश्च 13 Pi ०माभि० 14 B ०ल्लिध्ये० 15 B ०स्यपि० 16 B ०सन् — ॥१३४॥ 1 Pi इति 2 Pi आखण्ड-लस्य 3 Pi सुवानः 4 Pi उक्तो० 5 Pi om. इति 6 Pi, Pi om. विसर्गः 7 Bi, ०युक्ता 8 Pi ते 9 B हरिणी... ०युक्ता twice 10 Pi om. अर्थं 11 Pi om. अर्थं 12 Pi om. अनुप्रासः ॥१३५॥ 1 Pi text स्यात 2 Pi स्वं नैषधा।

सर्ग १० 71

स्वम् आत्मानं नैषधरूपम् आदेशं[3] विधाय नापि मनुष्यः पुरुषः नलः सन् किं स्थानिवद्भावं दुष्टम् अधत्त। इन्द्रवद्भावं दोषसंयुक्तमकरोत्। कस्मात्?। नैषधादेशं कृत्वा इत्याह — कार्यस्य दमयन्तीप्राप्तिलक्षणस्य हेतोरपि। तर्हि कथं [4]दुष्टत्वमित्याह। पुनस्तादृक्मर्त्योचितं कृतं गौरीहरिणीवीणावतीत्यादिशब्दानां व्याकरणं व्याकृतम् [5]अर्थकरणं येन स तथा। येनेन्द्रोचितम्। अप्सरोऽर्थानां [6]कथनं कृतम्। अतः स्थानिवद्भावो दुष्टः। अथ च यः पुनस्तादृक्कृतव्याकरणस्तादृक्कृतम् ऐन्द्रं व्याकरणं येन स कथं स्थानिवद्भावं दुष्टमधत्त। अत्र वैयाकरणनिकायस्य विचारः॥

स्थानिवदादेशोऽनल्विधौ (पा०१।१।५६) इति पाणिनिसूत्रम्। अस्यार्थः — आदेशः[7] भूरादेशः[8] स्थानिवद्भवति अस्तिवद्भवति। ततो धातुकार्याणि प्रत्ययादीनि तस्मादपि क्रियन्ते। [9]एवम् अङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः। यथा केन काभ्यां कैः इत्यत्र के आदेशे कृते आश्रयात् [10]नदीर्घत्वभिसः; ल्यबादेशे, ह्रस्वस्य पिति कृति तुक् (पा० ६।१।७१) इति तुक्; दाधिकम् अद्यतनं, कृत्तद्धितसमासाश्च (पा० १।२।४६) इति प्रातिपदिकसंज्ञा; प्रस्तुत्येत्यत्राऽव्ययादि (पा० २।४।८२) इति [12]सुब्लुक् कृताः; [13]अकरोत् अकुरुताम् अकुर्वन्, सुप्तिङन्तं पदम् (पा० १।४।१४) इति पदसंज्ञा। ग्रामो वः स्वम् पदस्य (पा० ८।१।१६) इति रुत्वम्; [14]स्थानिशब्देनाऽऽदेशः प्रकृतिभूत

3 P. space for नापि...पुरुषः M. P. for कथं...इत्याह 5 R. व्याख्यानं 6 P. कथनं 7 B. P. आदेशाश्च 8 B. P. देशो 9 R. om. एवम्...रुत्वम् 10 R. om. त्वभिसः।। 13 भिसे 12 P. शुब्लुक् 13 P. space for अकरोत् 14 R. स्थानी०

उच्यते। आदेशशब्देन विकृति[15]र्मतः। [क्व स्थानिवत् ?] अनल्विधौ। अल्-शब्देन वर्णा[16]स्तत्र सङ्केत्यन्ते। न अल् अनल् तस्य विधिः कार्यं तत्र [17]न वर्णकार्ये कर्त्तव्ये। स्थानिवद्भावः यथा - [18]दिव् पथिन् तद् इत्यादेशेषु
[19] लोपो न भवति। तथा ब्रुवो [20]धातोर्वच्यादेशे कृते स्थानि-वद्भावेन ब्रूत्वे सत्यपि अल् [21][अकार्यत्वात् वचो]र्[22]पकारस्य सार्वधातुके सम्प्रसारणे उकारे कर्त्तव्ये [23]वर्णकार्यकर्त्तव्ये वर्णकार्यत्वात् स्थानिवद्भावो न भवति। ततश्चेन्द्रोऽपि एवं नैषधादेशं [24]विधाय। नामत्र्योऽनलः [25][कार्यस्य हेतोः सोऽत्र विधेमानः। किं स्थानिवद्भावं दुष्टम् अघत्तेति विचारः। तस्मा-न्मनुष्योचितं व्याकरणमयुक्तं कृतम्। अनल्विधित्वस्य सम्भवात्। अत एव कविना नानलः कार्यस्याऽपि [26][ना इति] [27]मनुष्यौवाचकः। अकारप्रश्लेषेण अनल [इ]त्यवर्णस्येति वाचकम्। कार्यस्येति विधि-[28]वाचकान्येतानि पदानि ~~कृत्वा~~ कुर्वता। पाणिनिव्याकरणस्य सूत्रार्थो व्यञ्जितः॥ १३६॥

---

इयमियमधिरथ्यं याति नेपथ्यमञ्जुर्विशति विशति वेदीमुर्वशी सेयमुर्व्याः।
इति जनजनितैः सानन्दनादैर्विजघ्ने नलहृदि परभैमीवर्णनाकर्णनाप्तिः॥
॥१३७॥

[1]इय[मिति]। इति जनैर्जनितैः सानन्दैर्नादैर्नलहृदि परेषां लोकानां यद्भैमीवर्णनं तस्याऽऽ[2]कर्णनस्य, परा उत्कृष्टा या भैमी-वर्णना तस्या वा आकर्णनस्याऽऽप्तिः [3][विजघ्ने न श्रुता। इयम् इयं नेपथ्ये-

---

15 Pl. space for ०त...०वत 16 B स्तत्र० 17 Bh न alt. कर्त्तव्ये 18 Pr om. दिव् ... तथा 19 Pl. space for 20 Pl. add विसर्गः 21 Pl. space for अकार्यत्वा-द्वचेः 22 BPl. ०र्पिकार० 23 Pr om. वर्णकार्यकर्त्तव्ये 24 BPr विधाय 25 Pl. space for कार्यस्य हेतोः 26 Pl. space for ना इति 27 BPl. मनुआदेशवाचकः 28 Pr ०कान् इत्येo — ॥१३६॥ 1 Pr इय। 2 Pr om. ०वर्णनस्य... तस्या वा 3 Pl. space for विजघ्ने... किम् —

भैम्जुर्दमयन्ती रथ्यामधिकृत्य याति। सेयम् उर्व्याः पृथिव्या उर्वशी अप्सरोविशेषः वेदीं स्वयंवरभूमिकां विशति विशति। सम्भ्रमो यावद्बोधमिति द्विर्वचनम्।[4] आनन्दाङ्कः।[5] मालिनीवृत्तम्। अनुप्रासो जातिर्भावोदयश्च॥

॥१३७॥

---

[1]श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि[2] नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥१३८॥[3]

---

श्रीहर्षमिति] तस्य कवेरस्मिन्नैषधेश्वरचरिते [महा[4]काव्ये] दशमः सर्गो व्यरंसीत्। किंभूतस्य? न केवलं काव्येषु किन्तु] तर्केषु [ग्रन्थेषु] अपि असमो [निरुपमो] श्रमो [ऽभ्यासो] यस्य तस्य तथो]॥१३८॥[म]

---

[श्रीमानालिङ्गपण्डितः स्वसमयाविर्भूतसर्वाश्रम-
श्चाण्डूपण्डितसंज्ञितं प्रसुषुवे श्रीगौरिदेवी च यम्।
मत्वा व्याकरणं कुमारविसृतं श्रीमन्महादेवतः
काव्यस्याऽस्य स नैषधस्य दशमे सर्गेऽत्र टीकां व्यधात्॥१३९॥

---

इति [1]महापण्डितश्रीचाण्डूविरचितायां [श्री]नैषध-
[दीपिकायां] टीकायां[2] दशमः सर्गः॥१०॥[3]

---

4 R incomp. henceforth, with remark व्यक्त in lecto mg. sec. me.
5 R om. मालिनी०...०दयश्च॥१३७॥ 1 R+ext अर्धं लोव 2 R+ext वैरसेनि०
3 R+ext add स्वयंवराडम्बरो नाम म० काव्ये; edt. महाकाव्ये—॥१३८॥ 1 R
om. महा०...०विरचितायां 2 R add. स्वयंवराडम्बरो नाम 3 B ग्रन्थसङ्ख्या ७२०;
R ग्रन्थसङ्ख्या।